CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 531

Title Bhagavata

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 831 Subject : ~~Bhagavata~~ Puranic lit.

Title : Bhagavata. 12th sk.

Author : – Scribe : –

Date of the work : – Date of the Ms. : V.S. 2985

Place of the work : – Place of the Ms. : –

Size : 18.1" by 4.8" Extent : 91 foll.

Language : Samskrit. Script : Devanagari

Remarks :

॥ ७० ॥ ॥ ॐ नमो भगवते वासुदेवाय ॥ ॥ श्रीगुरुं परमानंदं वंदे आनंदविग्रहं य
त्संनतिमात्रेण चिदानंदायते नमः ॥ १ ॥ जयंति श्रीपरानंद कृपापांगलसदृशः । यानि
त्यमनुवर्त्तंते संपदो विगतादृशः ॥ २ ॥ उक्तस्त्रयोदशाध्यायैर्द्वादशे त्वाश्रयः सतां । अधि
ष्ठानावधित्वान्यामाश्रयस्येश्वरः सतः ॥ ३ ॥ उक्तो लयावधित्वेन प्राकृतात्यंतिके लये । अधि
ष्ठानतयाभ्योक्तो महापुरुषवर्णने ॥ ४ ॥ तत्रादौ षड्भिरध्यायैः शुकः प्राह परीक्षिते । शेषेत
त्राखिलान्याह स्वतः पृष्टानि सर्वनिः ॥ ५ ॥ स्वाश्रयस्य वर्णेकायेनिविलं बोमनीषिभिः । इत्येष्य भा० टी०
त्कालं विषमं चतुर्भिस्तावदुच्यते ॥ ६ ॥ तत्र तु प्रथमे भाविमागधान्वयभूमिपान् । कलिः १
प्रभावतः प्राह संकरादिमलीमसान् ॥ ७ ॥ एवं भूते सोमवंशे मुकुंदस्यैरकीर्तिवर्णिता थोसर्

राद्दिदोषैः प्रपंचयति । योंत्यइति ॥ १ ॥ श्रीशुक उवाच ॥ ॥ योंत्यः पुरंजनो नाम भाव्यो बार्हद्र
थो नृपः । तस्यामात्यस्तु शुनको हत्वा स्वामिनमात्मजं ॥ २ ॥ प्रद्योतसंज्ञं राजानं कर्त्ता य
त्पालकः सुतः । विशाखयूपस्तत्पुत्रो भविता राजकस्ततः ॥ ३ ॥ रिपुंजय एव पुरंज
यः । स्वामिनं पुरंजयं हत्वा स्वपुत्रं प्रद्योतं राजानं करिष्यति । यस्य पालको नाम सुतो
भविष्यति ॥ २ ॥ नंदिवर्द्धनस्तत्सुतः पंच प्रद्योतनाः इमे । अष्टत्रिंशोत्तरशतं भोक्ष्यं
ति पृथिवीं नृपाः ॥ ४ ॥ प्रद्योतनाः प्रद्योतसंज्ञाः ॥ ३ ॥ शिशुनागस्ततो भाव्यः काकव
र्णस्तु तत्सुतः । क्षेमधर्मा सुतस्तस्य क्षेत्रज्ञः क्षेमधर्मजः ॥ ५ ॥ विधिसारः सुतस्तस्या पुं टी०
जातशत्रुर्भविष्यति । दर्भकस्तत्सुतो भावी दर्भकस्याजयः स्मृतः ॥ ६ ॥ नंदिवर्द्धन आ २

व वंशो भावी वर्ण्यते। तस्य चक्रि मुक्त्वा मुक्त्यै कर्मनालीति वक्तुं। तदेवं वैवस्वतमनुवं
शे सोमवंशप्रस्तावेन श्रीकृष्णावतारचरितानि सप्रपंचमनुवर्णितानि। अथेदानीं
भावी सोमवंशः कलौ विजातीयसंकरादिमलीमसो वैराग्यद्वारा श्रीकृष्णैकचक्रि निग
मायानुवर्ण्यते॥ ॥१॥ राजोवाच॥ ॥स्वधामानुगते कृष्णे यदुवंशविभूषणे। कस्य वं
शोऽभवत्पृथ्व्यामेतदाख्याहि मे मुने॥२॥ तत्र नु सोमवंशशाखासु चिरकालानुवर्तितत
या मागधस्य वंशोऽनुक्रम्यते। तत्र च पूर्वोक्तवंशोपरिचरो वसुस्तस्य बृहद्रथः तस्य जरा
संधस्तस्य सहदेवः सुतोऽभूदित्युक्तं नवमस्कंधे। तत्र तु सहदेवान्मार्जारिस्तत्सुत
श्रवाः इत्यादयो रिपुंजयांता विंशतिर्भाविनो राजानो निरूपिताः। तदुपरितनं वंशं संक

जेया महानंदिः सुतस्ततः। शिशुनागा दशैवैते षष्ट्युत्तरशतत्रयं। समा भोक्ष्यंति पृथिवीं
कुरुश्रेष्ठ कलौ नृपाः॥७॥ महानंदिसुतो राजन्शूद्रीगर्भोद्भवो बली। महापद्मपति
र्ख्यातो नंदः क्षत्रविनाशकृत्॥८॥ नंदो नाम। स च महापद्मसंख्यायाः सेनायाः धनस्य वा
पतिर्भविष्यति। अत एव महापद्म इत्यपि तस्य नाम॥८॥ ततो नृपा भविष्यंति शूद्रप्रायास्त्व
धार्मिकाः॥ एकछत्रां स पृथिवीमनुल्लंघितशासनः। शासिष्यति महापद्मो द्वितीय इव भा
र्गवः॥१०॥ एकमेव छत्रं यस्यां तां पृथिवीं शासिष्यति। सर्वक्षत्रादनेहशंतः। भार्गवः परशु
राम इव॥१०॥ तस्य चाष्टौ भविष्यंति सुमाल्यप्रमुखाः सुताः। महीं भोक्ष्यंति ये समा राजान
स्स शतं समाः॥११॥ समाः संवत्सरान्॥११॥ नव नंदान्द्विजः कश्चित्प्रपन्नानुद्धरिष्यति। ते

षामभावे पृथिवीं मौर्या भोक्ष्यंति वै कलौ। स एव चंद्रगुप्तं वै द्विजो राज्येभिषेक्ष्यति॥१२॥ नव
नंदान्। नंदं च तत्सुतांश्चैवं नव। प्रपन्नान् विश्वस्तान्। विख्यातान्वा। द्विजः कौटिल्यवा
त्स्यायनादिपर्यायश्चाणक्यः। उद्धरिष्यति उन्मूलयिष्यति। मौर्याः मौर्यसंज्ञाः। कथं भोक्ष्य
ति। तदाह। स एवेति। चंद्रमौर्यप्रथमं॥छ॥ तत्सुतो वारिसारश्च ततश्चाशोकवर्द्धनः। सुयशा भ
विता तस्य संगतः सुयशःसुतः॥१२॥ शालिशूकस्ततस्तस्य सोमशर्मा भविष्यति। शतधन्वा
ततस्तस्य भविता तद्बृहद्रथः॥१३॥ मौर्या ह्येते दश नृपाः सप्तत्रिंशच्छतोत्तरं। समा भोक्ष्यंति
पृथिवीं कलौ कुरुकुलोद्वह॥१४॥ तेषां पंचमो दशरथः। परासरादिस्तु कौ
प्यत्राप्यनुसंधेयः। तेन सह मौर्या दश। सप्तत्रिंशच्छतोत्तरं सप्तत्रिंशदुत्तरं समाः॥छ॥ अ

भा० टी०
२

ग्निमित्रस्ततस्तस्मात्सुज्येष्ठो भविता ततः। वसुमित्रो भद्रकश्च पुलिंगो भविता ततः॥
१५॥ ततो घोषस्ततस्तस्माद्वज्रमित्रो भविष्यति। ततो भागवतस्तस्माद्देवभूतिः कुरू
द्वह॥१६॥ शुंगा दशैते भोक्ष्यंति भूमिं वर्षशताधिकं। ततः कण्वानियं भूमिः यास्यत्यल्पगु
णान्नृप॥१७॥ बृहद्रथस्य सेनापतिः पुष्यमित्रो नाम स्वामिनं बृहद्रथं। हत्वा राज्यं करिष्य
ति। स च शुंगानां प्रथमः ततोग्निमित्रादयो नवेत्येवं शुंगा दश। वर्षशताधिकं द्वादशाधिकं
वर्षशतं। कथं कण्वान् यास्यति। तदाह शुंगमिति॥छ॥ शुंगं हत्वा देवभूतिं कण्वोमात्यस्तु
कामिनं। स्वयं करिष्यते राज्यं वसुदेवो महामतिः॥१८॥ परस्त्रीकामिनं शुंगं हत्वा तदमा
त्यो वसुदेवनामा कण्वो राज्यं करिष्यति॥छ॥ ॥तस्य पुत्रस्तु भूमित्रः ततः पारायणः सु

तः॥ पारायणस्य भविता सुशर्मा नाम विश्रुतः॥१९॥ काण्वायना इमे भूमिं चत्वारिंशच्च पंच च
शतानि त्रीणि भोक्ष्यंति वर्षाणां च कलौ युगे॥२०॥ कण्वानां चतुर्थः सुशर्मा इमे वसुदेवा
दयः काण्वायनाः वर्षाणां त्रीणि शतानि पंचचत्वारिंशद्वर्षाणि भूमिं भोक्ष्यंति॥छ॥ हत्वा का
ण्वं सुशर्माणं तद्भृत्यो वृषलो बली। गां भोक्ष्यत्यंध्रजातीयः कथंचित्कालमसत्तमः॥२१॥ कण्वा
नामंतिमं सुशर्माणं हत्वा बलिदिक नामा तद्भृत्यो गां भोक्ष्यति॥छ॥ कृष्णनामाथ यद्भ्राता
भविता पृथिवीपतिः॥ श्रीशांतकर्णस्तत्पुत्रः पौर्णमासस्तु तत्सुतः॥२२॥ लंबोदरस्तु तत्पुत्रस्त
स्माच्चिबिलको नृपः। मेघस्वातिश्चिबिलकात् अटमानस्तु तत्सुतः॥२३॥ अनिष्टकर्मा हा
लेयस्तलकस्तस्य चात्मजः। पुरीषभीरुस्तत्पुत्रस्ततो राजा सुनंदनः॥२४॥ चकोरो बहवो भा० टी० ४
यत्र शिवस्वातिररिंदमः। तस्यापि गोमती पुत्रः पुरीमान् भविता ततः॥२५॥ यत्र येष्ठ बहुसं
ख्यकेषु श्रेष्ठ सुचरमः शिवस्वातिनामा भविता॥छ॥ मेदःशिराः शिवस्कंदो यज्ञश्रीस्तत्सु
तस्ततः। विजयस्तत्सुतो भाव्यः चंद्रविज्ञः सलोमधिः॥२६॥ एते त्रिंशन्नृपतयश्चत्वार्यब्दश
तानि च। षट्पंचाशच्च पृथिवीं भोक्ष्यंति कुरुनंदन॥२७॥ सप्ताभीरा आवभृत्या दशगर्द्दभि
नो नृपाः। कंकाः षोडश भूपाला भविष्यंत्यतिलोलुपाः॥२८॥ आवभृथाः अवभृतिनगरी
तत्र राजानः॥छ॥ ततो ऽष्टौ यवना भाव्याश्चतुर्दश तुरुष्ककाः। त्रयोदश मरुंडाश्च मौना एका
दशैव तु॥२९॥ एते भोक्ष्यंति पृथिवीं दश वर्षशतानि च। नवाधिकां च नवतिं मौना एकाद
श क्षितिं॥[illegible]॥ भोक्ष्यंत्यब्दशतान्यंग त्रीणि तैः संस्थिते ततः॥३०॥ एते आभीरादयो मौनव्य

व्यतिरिक्ताः अष्टपष्टिनृपाः एकोनशताधिकं वर्षसहस्रं पृथिवीं भोक्ष्यंति कुरुनंदन॥२८॥
सप्ताभीरा आवभृत्यो ततः पूर्वोक्ता एव एकादश मौनाः त्रीणि अष्टशतानि त्रिंशतिं भोक्ष्यंति।
तेः संस्थितेतेषु मृतेषु किलिकिलायां तु यं नृपतयो भविष्यंत्युत्तरेणान्वयः॥[illegible]॥ किलकि
लायां नृपतयो भूतनंदोथ वंगिरः शिशुनंदिश्च तद्भ्राता यशोनंदिः प्रवीरकः॥३०॥ युक्ता
एते वर्षशतं भविष्यंत्यधिकानि षट्॥३१॥ अधिकानि च षड्वर्षाणि॥[illegible]॥ तेषां त्रयोदश सु
ता भवितारश्च बाह्लिकाः॥३२॥ तेषां भूतनंदादीनां यथायथं बाह्लीकनामानः त्रयोदश सु
ता भविष्यंति॥[illegible]॥ पुष्पमित्रोथ राजन्यो दुर्मित्रोस्य तथैव च। एककाला इमे नृपाः सप्तां
ध्राः सप्तकौशलाः। विदूरपतयो भाव्या नैषधास्तत एव हि॥३३॥ अथ पुष्पमित्रो नामान्यो रा

भा०टी०
५

तस्य च दुर्मित्रो नाम पुत्रः। तथा आंध्राः कौशलाः विदूरपतयः नैषधाश्च एते तत्तद्देशानाम
भिः प्रख्याताः तुल्यकालाः एवं तु मंडलेषु नृपाः। तत एव तेभ्यो बाह्लीकेभ्य एव भाव्याः भवि
ष्यंति॥[illegible]॥ मागधानां तु भविता विश्वस्फूर्जिः। तोषपनु भविता भविष्यति। स च पूर्वोक्तात्पु
रंजयः। करिष्यत्यपरो वर्णान् पुलिंदयदुमद्रकान्॥३४॥ ततश्च मागधानां तु राजा विश्व
स्फूर्जिर्नाम भविता भविष्यति। स च पूर्वोक्तात्पुरंजयादपरः पुरंजय इति प्रसिद्धः स च व
र्णान् ब्राह्मणादीन् पुलिंदयदुमद्रकसंज्ञान् म्लेछप्रायान् करिष्यंति। अन्यान् पुलिंदा
दिवर्णान् करिष्यंतीत्यर्थः। किं च॥[illegible]॥ प्रजाश्चाब्रह्मभूयिष्ठाः स्थापयिष्यंति दुर्मतिः॥ वी
र्यवान् क्षत्रमुत्साद्य पद्मवत्यां स वै पुरि। अनुगंगामाप्रयागं गुप्तां भोक्ष्यंति मेदिनीं॥३५॥

एवं कृत्वा अब्रह्मण्यप्रियाः अत्रैव वर्णिक प्रचुराः सती॥ प्रजाः स्थापयिष्यति। पालयिष्यति। स
न्चपद्मवत्यां पुरी वसन्ननुगंगाद्वारमारभ्य प्रयागपर्यंतं गुप्तां पालितां मेदिनीं भोक्ष्यति
छ॥ सौराष्ट्रावंत्याभीराश्च शूरा अर्बुदमालवाः॥ व्रात्या द्विजा भविष्यंति शूद्रप्राया जनाधिपाः॥
३६॥ तदनंतरं सौराष्ट्रादिदेशवर्त्तिनो द्विजा व्रात्या उपनयनरहिता भविष्यंति॥ छ॥ सिं
धोस्तटं चंद्रभागां कौंतीं काश्मीरमंडलं। भोक्ष्यंति शूद्रा व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्चसः।
तुल्यकाला इमे राजन्म्लेच्छप्रायाश्च भूभृतः॥ ३७॥ अब्रह्मवर्चसः वेदाचाररहिताः॥ इ
मे च म्लेच्छप्राया भूभृतः तुल्यकाला भविष्यंति। किंच॥ छ॥ एते अधर्मानृतपराः फल्गुदा
स्तीव्रमन्यवः। स्त्रीबालगोद्विजघ्नाश्च परदारधनादृताः॥ ३९॥ एते सर्वे अधर्मानृतपराः

द्वा॰टी॰ ५

अधर्मे अनृते च निरताः। फल्गुदाः अल्पदातारः॥ छ॥ उदितास्तमितप्राया अल्पसत्त्वाल्प
कायुषः॥ असंस्कृताः क्रियाहीना रजसा तमसावृताः॥ प्रजास्ते भक्षयिष्यंति म्लेच्छा राजन्यरू
पिणः॥ ४०॥ उदितास्तमितप्रायाः हर्षशोकादिबहुलाः॥ असंस्कृताः गर्भाधानादिसंस्का
ररहिताः प्रजा भक्षयिष्यंति धनाद्युपहारादि पीडयिष्यंति। किंच॥ छ॥ तन्नाथास्ते जनपदा
स्तच्छीलाचारवादिनः॥ अन्योन्यतो राजभिश्च क्षयं यास्यंति पीडिताः॥ ४१॥ तन्नाथाः ते
षां येषां ते जनपदाः देशवर्त्तिनो मनुष्याः तच्छीलाचारवादिनः तेषामेव शीलमाचारो वाद
श्च तद्वंतः॥ ॥ छ॥ ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे मगधवंशानुकीर्त्तनं
नाम प्रथमोऽध्यायः॥ ॥ छ॥ ॥ द्वितीये तु कलेर्दोषवृद्धौ कल्क्यवतारतः। अधर्मिष्ठस्य नेन

हेतुनाः कृतयुगागमः॥२॥ कलिधर्मान्प्रपंचयति। ततश्चेत्यादिना॥ ॥ श्रीशुकोवाच॥॥
ततश्चानुदिनं धर्मः सत्यं शौचं क्षमा दया। कालेन बलिना राजन् नंक्ष्यत्यायुर्बलं स्मृतिः॥१॥
वित्तमेव कलौ नॄणां जन्माचारगुणोदयः। धर्मन्यायव्यवस्थायां कारणं बलमेव हि॥२॥ ध
र्मन्याययोर्व्यवस्थायां बलमेव॥ ॥ दांपत्येऽभिरुचिर्हेतुः मायैव व्यावहारिके। स्त्रीत्वे पुंस्त्वे
रं च रहिताः विप्रत्वे सूत्रमेव हि॥ ॥ दांपत्ये नार्यपतिभावे अभिरुचिरेव हेतुः। न कुलं
गोत्रादि। व्यावहारिके क्रयविक्रयादौ। स्त्रीत्वे पुंस्त्वे च तयोः श्रेष्ठत्वे रतिः रतिकौशलमेव द्वा०टी०
हेतुः॥ न कुलं समाचारो वा॥ ॥ लिंगमेवाश्रमख्यातावन्योन्यापत्तिकारणं। अवृत्त्या न्याय ८
दौर्बल्यं पांडित्ये चापलं वचः॥४॥ आश्रमाणां ख्यातौ ज्ञाने लिंगमेव दंडाजिनादि हेतुः। न

नत्वाचारविशेषः। अन्योन्यापत्तिकारणं। च आश्रमादाश्रमांतरप्राप्तौ च कारणं। यद्वा। बहू
दककहंसादीनामन्योन्यापत्तौ नमस्कारादिव्यवहारकारणं। अवृत्त्या मुद्रार्पणादिदानास
मर्थ्येन न्याये दौर्बल्यं पराजयः। चापलं वचः बहुभाषणं॥ ॥ अनाढ्यतैवासाधुत्वे साधुत्वे
दंभ एव च। स्वीकार एव चोद्वाहे स्नानमेव प्रसाधनं॥५॥ असाधुत्वे चौर्यादिनियोगे। प्रसाध
नं अलंकारः॥ ॥ दूरे वार्ययनं तीर्थं लावण्यं केशधारणं। उदरंभरता स्वार्थः सत्यत्वे धार्ष्ट्यमे
व हि॥६॥ दूरे वर्त्तमानं वार्ययनं जलाशयस्तीर्थं। न तु गुर्वादि। स्वार्थः पुरुषार्थः॥ ॥ दाक्ष्यं
कुटुंबभरणं यशोर्थे धर्मसेवनं। एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमंडले। ब्रह्मविट्क्षत्र
शूद्राणां यो बली भविता नृपः॥७॥ प्रजा हि लुब्धै राजन्यैर्निर्घृणैर्दस्युधर्मभिः। आच्छिन्नदार

द्रविणायास्यंति गिरिकाननं ॥८॥ आछिन्ना अपहृता दाराद्रविणानि च यासां ताः ॥ छ ॥ शाक
मूलामिषक्षौद्रफलपुष्पाष्टिभोजनाः ॥ अनावृष्ट्या विनंक्ष्यंति दुर्भिक्षकरपीडिताः ॥९॥ अष्टि
बीजं ॥ छ ॥ शीतवातातपप्रावृड्हिमैरन्योन्यतः प्रजाः ॥ क्षुत्तृड्भ्यां व्याधिभिश्चैव संतप्स्यंते च चिं
तया ॥ त्रिंशद्विंशति वर्षाणि परमायुः कलौ नृणां ॥१०॥ क्षीयमाणेषु देहेषु देहिनां कलिदोष
तः ॥ वर्णाश्रमवतां धर्मे नष्टे वेदपथे नृणां ॥११॥ क्षीयमाणेष्वित्यादिना इत्थं कलौ गतप्राये इति
पंचमेनान्वयः ॥ क्षीयमाणेष्वल्पप्रमाणेषु ॥ छ ॥ पाषंडप्रचुरे धर्मे दस्युप्रायेषु राजसु ॥ चौर्या
नृतवृथाहिंसानानावृत्तिषु वै नृषु ॥१२॥ दस्युप्रायेषु चोरतुल्येषु ॥ चौर्यानृतवृथाहिंसाया
नानावृत्तयो येषां तेषु ॥ छ ॥ शूद्रप्रायेषु वर्णेषु छागप्रायासु धेनुषु ॥ गृहप्रायेष्वाश्रमेषु

द्वा॰टी॰
८

यौनप्रायेषु बंधुषु ॥१३॥ छागप्रायासु प्रमाणतः क्षीरतश्च अजातुल्यासु ॥ छ ॥ अणुप्रा
यास्वोषधीषु शमीप्रायेषु शाखिषु ॥ विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु ॥१४॥ अणु
प्रायासु श्यामाकतुल्यासु ॥ शाखिषु वृक्षेषु ॥ विद्युत्प्रायेषु तडिद्बहुलेषु ॥ शून्यप्राये
षु धर्मादिरहितेषु सद्मसु गृहेषु ॥ छ ॥ इत्थं कलौ गतप्राये जनेषु खरधर्मिणि ॥ धर्मत्रा
णाय सत्वेन भगवानवतरिष्यति ॥१५॥ जनेषु खरधर्मिणि दुःसहचेष्टिते ॥ कलौ गतप्रा
ये समाप्तप्राये ॥ एतस्य पंचयति चतुर्भिः ॥ छ ॥ चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः ॥
सर्वत्राणाय साधूनां जन्म कर्मापनुत्तये ॥१६॥ चराचरगुरोरीश्वरस्येति च धर्मत्राणे हेतुः ॥ गु
रुत्वेश्वरत्वयोरुपपादनं ॥ अखिलस्य विश्वस्यात्मनः कारणस्येति ॥ एवंभूतस्य विष्णोर्जन्म

साधूनां धर्मत्राणाय। धर्मत्राणप्रयोजनमाह। कर्मापनुत्तयेमोक्षाय॥ छ॥ शंभलग्राम
मुख्यस्य ब्राह्मणस्य महात्मनः॥ भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति॥ १७॥ शंभलग्रा
ममुख्यस्य प्रधानस्य। नाम्ना विष्णुयशसो ब्राह्मणस्य भवने गृहे। धर्मत्राणप्रकारमाह।
अश्वमिति॥ छ॥ अश्वमाशुगमारुह्य देवदत्तं जगत्पतिः। असिनासाधुदमनमष्टैश्वर्य
गुणान्वितः॥ १८॥ असाधवो दम्यंते येन तमश्वमारुह्यासिना दस्यून्कोटिशो निहनिष्यती
त्युत्तरेणान्वयः॥ छ॥ असाधुदमनः इति पाठे कल्किविशेषणं। तत्र पंच॥ छ॥ विच
रन्नाशुना क्षोण्यां हयेनाप्रतिमद्युतिः। नृपलिंगच्छदो दस्यून्कोटिशो निहनिष्यति॥ १९॥
आशुना शीघ्रगामिना। तेन हयेन। क्षोण्यां विचरन्। नृपलिंगच्छदः। राजवेषच्छन्नान्। तत

भा॰टी॰

ततश्च पुनः कृतयुगप्रवृत्तिं वक्तुमाह। अथैतेषामिति सार्द्धाभ्यां॥ छ॥ अथ तेषां भविष्यंति म
नांसि विशदानि वै। वासुदेवांगरागातिपुण्यगंधानिलस्पृशां। पौरजानपदानां वै हतेष्व
खिलदस्युषु॥ २०॥ तेषां पौरजानपदानां मनांसि विशदानि भविष्यंति। तत्र हेतुः। वासुदेव
स्यांगरागेण चंदनादिना अतिपुण्यगंधो अनिलः तं स्पृशंतीति तथा तेषां॥ छ॥ तेषां प्रजाविसर्गश्च स्थ
विष्ठः संभविष्यति। वासुदेवे भगवति सत्त्वमूर्तौ हृदि स्थिते॥ २१॥ स्थविष्ठः स्थूलः॥ कृतयुगप्र
वृत्तिमाह। यदेति॥ छ॥ यदावतीर्णो भगवान् कल्किर्धर्मपतिर्हरिः। कृतं भविष्यति तदा प्र
जा सूतिश्च सात्विकी॥ २२॥ प्रजानां सूतिः प्रसूतिः तदवतारकालोपलक्षणमाह। यदा
चंद्रश्चेति॥ छ॥ यदा चंद्रश्च सूर्यश्च तथा तिष्यबृहस्पती। एकराशौ समेष्यंति तदा भव

ति तत्कृतं॥२३॥ तिष्यः पुष्यः अयमर्थः। चंद्रसूर्यबृहस्पतीनां यदा पुष्यनक्षत्रे योगः। त
दा तत्कृतयुगं भविष्यतीति। यद्यपि च प्रतिद्वादशाब्दं कर्कटराशौ बृहस्पतौ वर्त्तमाने प्रति
अमावास्यासु तेषां त्रयाणामपि पुष्ये संयोगः संभवति। तथापि तेषां सह प्रवेशो
विवक्षितः समेष्यंतीति वचनात्। अतो नातिप्रसंगः॥ एवं नवमस्कंधमारभ्य अनु
क्रांतं वैवस्वतमनोर्वंशद्वयं निगमयति। ये तीता इति॥ ये तीता वर्त्तमाना ये भविष्यं
ति च पार्थिवाः। ते त उद्देशतः प्रोक्ता वंशीयाः सोमसूर्ययोः॥२५॥ उद्देशतः संक्षेपतः॥ द्वा०टी०
कलियुगावांतरविशेषं वक्तुमाह। आरभ्येत्यादिना॥ ८॥ आरभ्य भवतो जन्म यावन्नंदा १०
भिषेचनं। एतद्वर्षसहस्रं तु शतं पंचदशोत्तरं॥२६॥ वर्षसहस्रं पंचदशोत्तरं शतं वर्षाणि

सार्द्धसहस्रं भवति। यतः परीक्षित्समकालं मागधं मार्जारिमारभ्य रिपुंजयांतानां विंश
तिराज्ञानः सहस्रसंवत्सरं भोक्ष्यंतीत्युक्तं नवमस्कंधे। ये बार्हद्रथाः भूपाला भाव्याः स
हस्रवत्सरमिति। ततः परं प्रद्योतनानामष्टत्रिंशदुत्तरं शतं। शिशुनागानां षष्ट्युत्तरशतत्रयं
भोक्ष्यंति। भोक्ष्यंति पृथिवीमित्युक्तत्वात्। कलेर्वृत्तिं वृद्धिं च निरूपयितुं कालज्ञानो
पलक्षणमाह। सप्तर्षीणां त्विति॥ ८॥ सप्तर्षीणां तु यौ पूर्वौ दृश्येते उदितौ दिवि। तयोस्तु
मध्ये नक्षत्रं दृश्यते यत्समं निशि। तेनैव ऋषयो युक्ताः तिष्ठंत्यब्दशतं नृणां। ते त्वदीये द्वि
जाः काले अधुना चाश्रिता मघां। अयमर्थः। प्रागग्रशकटाकारं तारासप्तकं सप्तर्षिमंड
लं। तत्र किंचिदुन्नतैषामग्रस्थानीयो मरीचिः ततः पश्चाद्दानम्रसुगकंधराकारो वसिष्ठः स

नार्थः। ततः पश्चादुन्नतेषां मूलस्थानीयोंगिराः। ततः पश्चाच्चतुरस्त्वं तारा चतुष्के दृश्यन्ते।
त्रि। ततो दक्षिणतः पुलस्त्यः। पुलस्त्यात्पश्चिमतः पुलहः। ततः उत्तरतः क्रतुः। एवं स्थिते
तेषां मध्ये तयोस्तु पूर्वयोश्च मध्ये यत्समं दक्षिणतः समदेशावस्थितमश्विन्यादि भुयदन्य
तमं नक्षत्रं दृश्यते तेन नक्षत्रे युक्ता नृणामब्दशतं तिष्ठंति। ते च द्विजास्त्वदीये काले अधुनाम
घामाश्रित्य वर्तन्ते॥ ॥ विष्णोर्भगवतो भानुः कृष्णाख्योऽसौ दिवं गतः। तदाविशत्कलिर्लोकं
पापे यद्रमते जनः॥ २८॥ तेषु मघासु वर्तमानेषु सत्सु यदा विष्णोर्भानुः भातीति भानुः शुद्ध
सत्त्वात्मको देहः दिवं वैकुंठं गतस्तदा कलियुगमविशत्। यत्र यस्मिन्युगे जनः पापे रम द्वा०टी० ११
त इति कलियुगस्य लक्षणं। ननु श्रीकृष्णे पृथिव्यां वर्तमानेपि संध्यारूपेण कलिः प्रविष्ट

एवासीत्। सत्यं तथापि तावत्तस्य पराक्रमो नाभवदित्याह। यावदिति॥ ॥ यावत्स पादप
द्माभ्यां स्पृशन्नास्ते रमापतिः। तावत्कलिर्वै पृथिवीं पराक्रान्तुं न चाशकत्॥ २९॥ पराक्रां
तुं अभिभवितुं। क्रमोऽयथोक्त एव कलिप्रवेशकाल इत्याह। यदेति॥ ॥ यदा देवर्षयः स
प्त मघासु विचरन्ति हि। तदा प्रवृत्तस्तु कलिर्द्वादशाब्दशताधिकः॥ ३०॥ द्वादशाब्दशता
धिक इति दिव्येन मानेन संध्यांशाभ्यां सह यो द्वादशाब्दशताधिकः स कलिः तदा संध्या
मतिक्रम्य प्रविष्ट इत्यर्थः। कलेः प्रवेशकालमुक्त्वा तस्य वृद्धिकालमाह। यदेति॥ यदाम
घाभ्यो यास्यन्ति पूर्वाषाढां महर्षयः। तदा नंदात्प्रभृत्येष कलिर्वृद्धिं गमिष्यति॥ ३१॥ तदा
प्रद्योतनात्प्रभृति वृद्धिं गच्छन् नंदात्प्रभृति अतिवृद्धिं गमिष्यतीत्यर्थः। ननु यदा कलेर्लिंग

मुपलक्ष्यं तदैव प्रविष्ट इति उक्तं। ततः पूर्वमेव प्रवेशः। ततः परं वृद्धिरित्यत्र किं प्रमाणं त
दाह। यस्मिन्निति।।छ।।यस्मिन् कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि। प्रतिपन्नं कलि
युगमिति प्राहुः पुराविदः।।३३।। प्रतिपन्नं प्रविष्टमिति ज्ञानं तु पुराविदः पूर्वेज्ञाताः एव
मनंतरं कृतयुगप्रवेशमाह दिव्येति।छ।।दिव्याब्दानां सहस्रांते चतुर्थे तु पुनः कृते। भ
विष्यति तदा नृणां मन आत्मप्रकाशकं।।३४।।दिव्याब्दानां चतुर्थे सहस्रांते पुनः कृते भ
विष्यति तदेति। राजवंशो कास्थितिं आलक्षणादिवंशो घटितदिशति।छ।।इत्येष मानवो वंशो
यथा वंशायते भुवि। तथा विट्शूद्रविप्राणां तास्ता ज्ञेया युगे युगे।।३५।।यथायानि कृत्यानी भा॰टी॰ १२
चावस्थानि तास्ता अवस्था वंशाश्च इति पाठः। एतत्कीर्तनस्य वैराग्योपयोगितामाह।छ।।ए

तेषां नामलिंगानां पुरुषाणां महात्मनां। कथामात्रावसिष्ठानां कीर्त्तिरवस्थिता भुवि।।३६।।
नामैव लिंगं ज्ञापकं येषां तेषां कथामात्रेणैवावसिष्ठानां कीर्त्तिरवस्थिता।। ननु राजपुत्रा
दयो या। कलावुच्छिन्नानां राजवंशादीनां पुनः प्रवृत्तिप्रकारमाह।छ।।देवापिः शंतनो
र्भ्राता मरुश्चेक्ष्वाकुवंशजः। कलापग्राम आसाते महायोगबलान्वितौ।।३७।।देवा
पिः सोमवंशजः। मरुः सूर्यवंशजः। कलापग्रामो नाम योगिनां वासः प्रसिद्धः।छ।।तावि
हैत्य कलेरंते वासुदेवानुशिक्षितौ। वर्णाश्रमयुतं धर्मं पूर्ववत्प्रथयिष्यतः।।३८।।इम
मेव प्रकारं चतुर्युगं प्रतिदर्शयति। कृतमिति।।छ।।कृतं त्रेता द्वापरं च कलिश्चेति चतु
र्युगं। अनेन क्रमयोगेन भुवि प्राणिषु वर्तते।।३९।।एतेषां नामलिंगानामित्यादि यदुक्तं

तत्प्रपंचयति। राजन्निति पंचभिः॥ छ॥ राजन्नेते मया प्रोक्ता नरदेवास्तथापरे। भूमौ ममत्वं
कृत्वांते हित्वेमां निधनं गताः॥ ४१॥ ममत्वं कृत्वेत्यनेन सूचितां भूतद्रोहं प्रदर्शिनिंदति। छ
कृमिविड्भस्मसंज्ञांते राजनाम्नोऽपि यस्य च। भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः॥ ४२॥
राजनाम्नः राजेति नाम यस्य। तस्यापि देहस्यांते कृमयो विष्ठा भस्मेति वा संज्ञा भवति। तस्य
देहस्य पोषणार्थं यो भूतध्रुक् भूतेभ्यो द्रुह्यति स किं स्वार्थं वेद कुतः इत्यपेक्षायां देहत्वे
न भूतद्रोहं विशिनष्टि। यतो भूतद्रोहान्निरयो भवति। ममत्वं प्रकारं प्रपंचयति। कथमिति।
छ॥ कथं सेयमखंडा भूः पूर्वैर्मे पुरुषैर्धृता॥ मत्सुतस्य च पौत्रस्य मत्पूर्वा वंशजस्य वा॥ ४३॥ भा० टी०
सेयमखंडा भूः मे पूर्वजैः पुरुषैः धृता सती इदानीं मत्पूर्वा सती मत्सुतादेः कथं स्यादेवं॥ छ॥ १२

तेजोऽबन्नमयं कायं गृहीत्वात्मतयाबुधाः॥ महीं ममतया चोभौ हित्वांते दर्शनं गताः॥ ४४॥
उभौ महीकायं च अदर्शनं मृत्युं उपसंहरति ये ये इति॥ छ॥ ये ये भूपतयो राजन् भुंजंति भुव
मोजसा। कालेन ते कृताः सर्वे कथामात्राः कथासु च॥ ४५॥ ते सर्वे कथासु क्रियमाणासु क
थामात्राः कालेन कृताः॥ ॥ छ॥ ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे वंशानुव
र्णने द्वितीयोऽध्यायः॥ ॥ तृतीये भूमिगीतिश्च राजदोषादि वर्ण्यते। कलौ च दोषभूयि
ष्ठे दोषहं श्रीहरेर्नुतिः॥ देहेऽहंतां ममतां कुर्वंत्यतोऽबुधा इत्युक्तं तदेव भूमिगीतैः प्रपंचयति
दृष्ट्वात्यादिना॥ श्रीशुक उवाच॥ ॥ दृष्ट्वात्मनि जये व्यग्रान् नृपान् हसति भूरियं। अहो मां
विजिगीषंति मृत्योः क्रीडनका नृपाः॥ १॥ आत्मनि पृथिव्यां जये व्यग्रान् उद्युक्तान्। हासम

कारमाह। अहो इति।।७।। कामएष नरेंद्राणां मोघः स्याद्विद्विषामपि। येन फेनोपमेपिं
डे येन विश्रंभिता नृपा।। येन कामेन फेनोपमे पिंडे देहे विश्रंभिता विश्वासं नीता येते षां नरेंद्रा
णां स एष कामो मोघ एव स्यात्। काममेव दर्शयति। इर्वमिति द्वाभ्यां।।८।। इर्वं निर्जित्य ष
ड्वर्गं जेष्यामो राज्यमंत्रिणः।। ततः सचिवपौराश्च करींद्रानस्य कंटकान्।।९।। इंद्रियार्थलंपट
स्य नराज्यप्राप्तिः स्यादिति प्रथममिंद्रियषड्वर्गं निर्जित्य राजमंत्रिणो जेष्यामः।। वशीकरिष्या
मः।। सचिवा अमात्याः करींद्रा हस्तिपाः। तांश्च जेष्यामः।। कंटकान् प्रतिपक्षान् अपास्य चक्र
वर्त्तिनो भवेम।।७।। एवं क्रमेण जेष्यामः पृथ्वीं सागरमेखलां। इत्याशाबद्धहृदया न पश्य धा०टी० १४
त्यंतिके नरकं।।४।। एवं किंचिदाशाबद्धहृदया।।७।। सागरावरणां जित्वा मां विशं त्यब्धिमो जन

म।। कियदात्मजयस्यैतत् मुक्तिरात्मजयेफलं।।५।। केचित्तु नमं जित्वापि अतिनृत्सपर्ष्छि
विशंति। तदेवमिंद्रियजयेन ये राज्यं साधयितुमिछंति ते तिमंदा इत्याह। कियदिति। अंतकं न धा०टी०
पश्यंती लुब्धं। तदेवाह। यामिति।।७।। यां विसृज्यैवमनवस्तस्मु तांश्च ऊरुहृद्वह। गतायथागतं पु
ह्रतां मां जेष्यं त्यबुद्धयः।।९।। नूमिगीतं कथयन्नस्तुकः संबोधयति। हे ऊरुहद्वह। अबुद्धयः इत्यु
क्तं। तत्प्रपंचयति। मत्कृतेति।।७।। मत्कृते पितृपुत्राणां भ्रातृणां चापि विग्रहः।। जायते सत
राज्ये ममतावद्धचेतसां।।७।। ममैवेयं मही कृत्स्ना न तेमहे तिवादिनः।। स्पर्द्धमाना मिथो घ्नंते
म्रियंते मत्कृते नृपाः।।८।। पृथुः कुरूरवा गाधिर्नहुषो भरतोर्जुनाः।। मांधाता सगरो रामः खट्वांगो
धंधुहा रघुः।।९।। रामो नाम कश्चिद्राजा। धंधुहा धंधुमारः।।७।। तृणबिंदुर्ययातिश्च शर्यातिः शं

न्तनुर्गयः॥ भगीरथः कुवलयाश्वः ककुत्स्थो नैषधो नृगः॥१०॥ हिरण्यकशिपुर्वृत्रो रावणो
लोकरावणः। नमुचिः शंबरो भौमो हिरण्याक्षोऽथ तारकः॥११॥ लोकं रावयन्ति रोदयन्तीति
लोकरावणः॥ छ॥ अन्ये च बहवो दैत्या राजानो ये महेश्वराः॥ सर्वे सर्वविदः शूराः सर्वे
सर्वजितोऽजिताः॥१२॥ ममतां मय्यवर्तन्त कृत्वोच्चैर्मर्त्यधर्मिणः। कथावशेषाः कालेन
ह्यकृतार्थाः कृता विभो॥१३॥ मयि उच्चैर्ममतां कृत्वा ये अवर्तन्त ते कालेन कथावशेषाः
कृताः विभो इति संबोधनं। राजवंशानुकथनस्य तात्पर्यमाह। कथेति। कथा इमास्ते क
थिता महीयसां वितायलोकेषु यशः परेयुषां। विज्ञानवैराग्यविवक्षया विभो वचोविभू भा॰ टी॰ १५
[illegible] तीर्न तु पारमार्थ्यं॥१४॥ विज्ञानं विषयासारतां ज्ञानं ततो वैराग्यं

तयोर्विवक्षया परेयुषां महतां वचोविभूतीः वाग्विलासमात्राः कथाः॥ परमार्थं परमार्थयुक्तं
तत्कथनं न भवतीत्यर्थः। कस्तर्हि पुरुषाणामुपादेयः परमार्थः तमाह यस्त्विति॥ छ॥ यस्तूत्त
मश्लोकगुणानुवादः संस्तूयतेऽभीक्ष्णममंगलघ्नः॥ तमेव नित्यं शृणुयादभीक्ष्णं कृष्णे
मलां भक्तिमभीप्समानः॥१५॥ नित्यं प्रत्यहं। तत्राप्यभीक्ष्णं। कलिदोषोपचये सति तत्क्र
रसंत्तवं मन्यमानः पृच्छति। छ॥ राजोवाच॥ ॥ केनोपायेन भगवन् कलेर्दोषान् कलौ ज
नाः॥ विधमिष्यंत्युपचितान् तन्मे ब्रूहि महामुने॥१६॥ केनोपायेन विधमिष्यंति। यथायथा
वत्। कलियुगे कः परो धर्मः। इति बुभुत्सया पृच्छति युगानीति। छ॥ युगानि युगधर्मांश्च मा
नं प्रलयकल्पयोः॥ कालस्येश्वररूपस्य गतिं विष्णोर्महात्मनः॥१७॥ ब्रूहीत्यनुषंगः॥ आस्यंति

कजिज्ञासया पुनः पृच्छति। प्रलयकल्पयोः संहारस्थितिकालयोः॥ नचायं बहिर्मुखः प्रश्नइ
त्याह। कालस्येति। तत्र युगधर्मास्तावदाह। कृतेति। श्रीशुक उवाच॥ कृते प्रवर्त्तते धर्मश्च
तुःपात्तज्जनैर्धृतः॥ सत्यं दयाव तपो दानमिति पादाः कृते कृता॥१८॥ तज्जनैस्तत्कालीनैर्ज
नैः। दानं च रागद्वेषतया अन्नयदानं आत्मज्ञानमित्यर्थः॥ तदेव प्रथमस्कंधेशो चशष्टेनोक्तं।
विनोः संपूर्णस्य धर्मस्य। तदानीं तज्जनानाह। संतुष्टा इति। ॥ संतुष्टाः करुणामैत्राः शांता
दांतास्तितिक्षवः॥ आत्मारामाः समदृशः प्रायशः श्रमणा जनाः॥१९॥ मैत्राः सुहृदः मैत्रीयुक्ताः॥ द्वा०टी०
श्रमणाः आत्माभ्यासे कृतश्रमाः॥ ॥ त्रेतायां धर्मपादानां तुर्यांशो हीयते शनैः॥ अधर्मपादै ११
रनृतहिंसासंतोषविग्रहैः॥२०॥ हिंसया दया असंतोषेण तपः। अनृतेन सत्यं॥ ॥ तदा क्रि

यातपोनिष्ठा नातिहिंस्रा नलंपटाः॥ त्रैवर्गिकास्त्रयीवृद्धा वर्णा ब्रह्मोत्तरा नृप॥२१॥ ब्रह्मोत्तरा
ब्राह्मणप्रधानाः॥ तपःसत्यदयादानेष्वर्द्धं ह्रसति द्वापरे। हिंसातुष्ट्यनृतद्वेषैः धर्मस्याध
र्मलक्षणैः॥२२॥ अनृतेन सत्यं हिंसया दया असंतोषेण तपः। विग्रहेण दानमिति य
थासंख्यं योज्यं॥२३॥ हिंसातुष्ट्यनृतद्वेषैः इत्ययं क्रमो न विवक्षितः। धर्मस्यार्धं ह्रसति
हीयते। अधर्मस्य लक्षणैः पादैरित्यर्थः॥ ॥ यशस्विनो महाशीलाः स्वाध्यायाध्ययनेरताः॥
आढ्याः कुटुंबिनो हृष्टाः वर्णाः क्षत्रद्विजोत्तराः॥२३॥ यशस्विनः कीर्तिप्रधानाः। क्षत्रद्विजो
त्तराः क्षत्रियब्राह्मणप्रधानाः॥ ॥ कलौ तु धर्मपादानां तुर्यांशोऽधर्महेतुभिः॥ एधमानैः क्षीय
माणो ह्यंते सोऽपि विनंक्ष्यति॥२४॥ कलौ धर्मपादानां तुर्यांशश्चतुर्थभागः अवशिष्यते। एधमा

नेवर्द्धमाने॥छ॥तस्मिन्लुब्धादुराचारा: निर्दया: शुष्कवैरिणः॥दुर्भगाभूरितर्षाश्चशूद्रदा
सोत्तरा: प्रजा:॥२५॥शूद्रदासोत्तरा: शूद्रकैवर्त्तादिप्रधाना॥युगानामेवंभूतविषमेकारण
माह। सत्त्वमितिपंचभि॥सत्त्वंरजस्तमइतिदृश्यंतेपुरुषेगुणाः॥कालसंचोदितास्तेवैपरि
वर्त्तंतआत्मनि॥२६॥प्रभवंतियदासत्त्वेमनोबुद्धींद्रियाणिच॥तदाकृतयुगंविद्यात्ज्ञानेतप
सियद्रुचि:॥२७॥मनश्चबुद्धींद्रियाणिचसत्त्वेयदाप्रभवंति। अतिशयेनवर्त्तंतेयदा॥छ॥य
दाकर्मसुकाम्येषुभक्तिर्यशसिदेहिनां। तदात्रेतारजोवृत्तिरितिजानीहिबुद्धिमान्॥२८॥क
र्मादिषुभक्ति: प्रीति: तदारजोवृत्तिप्रधानंत्रेतायुगंजानीहि॥छ॥यदालोभस्त्वसंतोषोमानो
दंभोथमत्सर:। कर्मणांचापिकाम्यानांद्वापरंतद्रजस्तम:॥२९॥काम्यानांकर्मणांविषयेयदा:

भा०टी०
१७

प्रीति: तदारजस्तमप्रधानंद्वापरंजानीहि॥छ॥यदामायानृतंनिद्रातंद्राहिंसाविषादनं। शोक
मोहौभयंदैन्यंसकलिस्तामस: स्मृत:॥३०॥मायावंचनं। निद्राआलस्यंविषादनंदु:खं। कलि
दोषान्प्रपंचयति। यस्मादिति॥छ॥यस्मात्क्षुद्रदृशोमर्त्याःक्षुद्रभाग्यामहाशना:॥कामिनो
वित्तहीनाश्चस्वैरिण्यश्चस्त्रियोसती:॥३१॥यस्मात्कलौहेतो: क्षुद्रदृश: मंदमतय: क्षुद्रभा
ग्या: महाशना: बह्वाहारा:॥वित्तहीनाअपिकामिन:। स्वैरिण्य: पुंश्चल्य: असती: असत्या।छ॥
दस्यूत्कृष्टाजनपदा: वेदा:पाषंडदूषिता:॥राजानश्चप्रजाभक्षा: शिश्नोदरपराद्विजा:॥३२॥द
स्यव: उत्कृष्टा: प्रचुरायेषुते। प्रजाभक्षा: सर्वस्वहरणात्॥छ॥अव्रतावटवोऽशौचाभिक्षव
श्चकुटुंबिन:। तपस्विनोग्रामवासान्यासिनोत्यर्थलोलुपा:॥३३॥वटव: ब्रह्मचारिण:॥अव्र

ता विहिताचारशून्याः। अशौचाः शौचशून्याश्च। कूटं विनश्वरहस्ताः स्वयं निज्ञाटनपरान
विष्यंति। सन्यासिनो यतयः स्वर्यलोलुपा भविष्यंति। पुनरपि स्त्रीणां स्वनावमाह। ह्रस्वकाय
इति॥ ॰॥ ह्रस्वकाया महाहारा भूर्यपत्यागतह्रियः। शश्वत्कटुकभाषिण्यः चौर्यमायाहसाह
साः॥ ३४॥ कटुकभाषिण्यः अप्रियभाषिण्यः। चौर्यं च माया च कपटं च उरुसाहसं च यासां ताः॥
॰॥ पणयिष्यंति विकृता किराटाः कूटकारिणः। अनापद्यपि मंस्यंते वार्त्तां साधुजुगुप्सितां॥ अ
किराटाः पणिजः पणयिष्यंति क्रयविक्रयादिना व्यवहारं प्रवर्त्तयिष्यंतीत्यर्थः॥ ॰॥ पतिं त्यक्ष्यं
ति निर्द्रव्यं भृत्याश्चाप्यखिलोत्तमं। भृत्यं विपन्नं पतयः कौलं गाश्चाप्यपयस्विनीः॥ ३५॥ सर्वोत्तम
मपि पतिं स्वामिनं द्रव्यहीनं भृत्यास्त्यक्ष्यंति। पतयश्च विपन्नं रोगादिभिः व्यापारासमं। कौलं कु

पा०टी०
१९

लपरंपरायातं भृत्यं त्यक्ष्यंति। गाश्चापयस्विनीर्दुग्धदोहाः॥ ॰॥ पितृभ्रातृसुहृज्ज्ञातीन्हि
त्वा सौरतसौहृदाः॥ ननंदृश्यालसंवादादीनाः स्त्रैणाः कलौ नराः॥ ३७॥ सौरतं सुरतनिमि
त्तं सौहृदं येषां ते सौरतसौहृदाः॥ अनएव ननंदा भार्याः भगिन्यः श्याला भार्यायाः भ्रातरः॥
तैः संवादो मंत्रालोचनं येषां ते॥ ॰॥ शूद्राः प्रतिग्रहीष्यंति तपोवेषोपजीविनः॥ धर्मं वक्ष्यं
तिधर्मज्ञाः अधिरुह्योत्तमासनं॥ ३८॥ तपस्विनां वेषः जीवनसाधनं येषां शूद्राणां॥ नधर्मं
जानंतीत्यधर्मज्ञाः तेऽपि ब्राह्मणादीनामुपदेशं दास्यंति॥ ॰॥ नित्यमुद्विग्नमनसो दुर्भि
क्षकरकर्शिताः॥ निरन्ने भूतले राजन्ननावृष्टिभयातुराः॥ ३९॥ वासोन्नपानशयन
व्यवायस्नानभूषणैः॥ हीनाः पिशाचसदृशा भविष्यंति कलौ प्रजाः॥ ४०॥ कलौ काकिणिके

प्यर्थे विगृह्य त्यक्तसौहृदाः॥ त्यक्ष्यंति हि प्रियान् प्राणान् हनिष्यंति स्वकानपि॥४१॥ काकिणिके
विंशतिवराटिकामात्रेप्यर्थे विषये तेन मतिविग्रस्य विग्रहं कृत्वा प्रियानपि प्राणान् त्यक्ष्यंति॥
न रक्षिष्यंति मनुजाः स्थविरौ पितरावपि। पुत्रान् भार्यां च कुलजां क्षुद्राः शिश्नोदरंभराः॥४२॥
महांतमनर्थमाह द्वाभ्यां कलाविति॥ छ॥ कलौ न राजन् जगतां परं गुरुं त्रिलोकनाथानतपा
दपंकजं। प्रायेण मर्त्या भगवंतमच्युतं यक्ष्यंति पाखंडविभिन्नचेतसः॥४३॥ त्रिलोकना
थैः अवनतं नमस्कृतं पादपद्मं यस्य तं न यक्ष्यंति नाराधयिष्यंति। पाखंडैर्विभिन्नं अन्यथा
कृतं चेतो येषां ते॥ छ॥ यन्नामधेयं म्रियमाण आतुरः पतन् स्खलन् वा विवशो गृणन् पु
मान्। विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यंति न तं कलौ नराः॥४४॥ विवशोऽपि गृ

भा० टी०
१८

णन् विमुक्ताः कर्मरूपा अर्गला प्रतिबंधो यस्य सः॥ तदेवं कलिदोषान् प्रपंच्य प्रस्तुतं तन्नि
स्तारोपायमाह। पुंसामिति षड्भिः॥ छ॥ पुंसां कलिकृतान् दोषान् द्रव्यदेशात्मसंभवान्। स
र्वं हरति चित्तस्थो भगवान् पुरुषोत्तमः॥४५॥ द्रव्यदेशात्मभिः संभवो येषां तान्। चित्तस्थः
चित्ते स्फुरितः॥ छ॥ श्रुतः संकीर्तितो ध्यातः पूजितश्चादृतोऽपि वा। नृणां धुनोति भगवान् हृ
त्स्थो जन्मायुताशुभं॥४६॥ अयमेवोपायः कलिमलनिराकरणे नान्य इति सदृष्टांतमाह।
यथेति॥ छ॥ यथा हेम्नि स्थितो वह्निर्दुर्वर्णं हंति धातुजं। एवमात्मगतो विष्णुर्योगिनामशुभा
शयं॥४७॥ धातुजं ताम्रादिसंश्लेषजातं। हेम्नो दुर्वर्णं मालिन्यं तत्र स्थितो वह्निरेव हरति न
तु तोयादिभिः॥ एवं योगिनामपि विष्णुरेव। ननु योगादिकमित्यर्थः। एतदेव विवृणोति। विद्येति

विद्यातपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजप्यैः॥ नात्यंतशुद्धिं लभतेंतरात्मा यथा हृदि
स्थे भगवत्यनंते॥४८॥ तस्मात्सर्वात्मना राजन् हृदिस्थं कुरु केशवं। म्रियमाणो ह्यवहित
स्ततो यासि परां गतिं॥४९॥ म्रियमाणैरभिध्येयो भगवान् जगदीश्वरः। आत्मभावं नयत्यंग
सर्वात्माछिन्नसंशयः॥५०॥ आत्मभावं स्वस्वरूपं। इदानीं कलिं स्तौति द्वाभ्यां। छ॥ कलेर्दोष
निधे राजन्नस्ति ह्येको महान् गुणः। कीर्त्तनादेव कृष्णस्य मुक्तबंधः परं व्रजेत्॥५१॥ कृ
ते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः। द्वापरे परिचर्यायां कलौ तद्धरिकीर्त्तनात्॥५२॥ द्वा० टी०
एतत्सर्वं हरिकीर्त्तनादेव कलौ भवति नान्यस्मिन् युगे॥ ॥इति श्रीभागव० द्वादशस्कं २०
धे युगानुवर्णनो नाम तृतीयोऽध्यायः॥ ॥छ॥ ॥चतुर्थे तु चतुर्धा प्रलया नैमित्तिकादयः।

तत्र संसारनिस्तारो हरिकीर्त्तिर्वर्ण्यते। कलिदोषनिवर्त्तकं हरिकीर्त्तनादिकं। स एव चक
लौ परमो धर्म इति प्रदर्शयन् द्वयस्यांतरमुक्तं। यच्चान्यत्पृष्टं प्रलययोर्मानं ब्रूहीति तदिदानीं चत
यत्कथोक्तकालानुवादपूर्वकं निरूपयति। काल इति। छ॥ श्रीशुक उवाच॥ ॥कालस्ते परमा
ण्वादिर्द्विपरार्द्धावधिर्नृप। कथितो युगमानं च शृणु कल्पलयावपि॥१॥ स कालः परमाणुर्वै
यो भुंक्ते परमाणुतामित्यादिना कालः कथितः। चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमं। सं
ख्यातानि सहस्राणि द्विगुणानि शतानि चेति। युगमानं च कथितं। तत्र कल्पप्रमाणमाह। च
तुर्युगेति॥ छ॥ चतुर्युगसहस्रं तु ब्रह्मणो दिनमुच्यते। स कल्पो यत्र मनवश्चतुर्दश विशांप
ते॥२॥ चतुर्दश मनवः क्रमेण भवंति। प्रलयस्तु चतुर्विधः। नैमित्तिकः प्राकृतिकात्यंतिको

नित्यश्चेति तत्र नैमित्तिकं प्रलयमहितमाह। तदंतरं निवाप्यां॥ ३॥ तदंते प्रलयस्तावान्ब्राह्मी
रात्रिरुदाहृता। त्रयो लोका इमे यत्र कल्पंते प्रलयाय हि॥ ४॥ तदंते तस्य प्रलयस्य अंते तावान्च
तुर्युगसहस्रप्रमाणः। सैव ब्राह्मी रात्रिः। नैमित्तिकं प्रलयं दर्शयति॥ ५॥ एष नैमित्तिकः प्रोक्तः प्र
लयो यत्र विश्वसृक्। शेतेनंताशनो विश्वमा। त्मसात्कृत्य चात्मभूः॥ ६॥ यत्र यदा विश्वसृक् अना
शयनः विश्वं आत्मसात्कृत्य स्वस्मिन्नुपसंहृत्य शेते। आत्मसात्कृत्य स्वस्मिन्नुपसंहृत्य शेते। आत्म
भूर्ब्रह्मा च तस्मिन्शेते तयोरभेदविवक्षया ब्रह्मण एवानंतासनमुक्तं। ब्रह्मणो निद्रां निमित्ती द्वा०टी० २१
कृत्य प्रवर्त्तमानो लोकत्रयप्रलयो नैमित्तिक इत्यर्थः॥ प्राकृतिकं प्रलयमाह। द्विपरार्द्धेति। द्वि
त्यां॥ ७॥ द्विपरार्द्धे व्यतिक्रांते ब्रह्मणः परमेष्ठिनः। तदा प्रकृतयः सप्त कल्पंते प्रलयाय वै॥ ८॥ द्वि

परार्द्धे ब्रह्मण आयुषि सप्त प्रकृतयः महदहंकारपंचतन्मात्राणि॥ ९॥ एष प्राकृतिको रा
जन्प्रलयो यत्र लीयते। आंडकोशस्तु संघातो विघात उपसादिते॥ १०॥ संघातः महदादिकार्यरू
तः प्रकृतीनां तत्कार्यब्रह्मांडस्य लयात् प्राकृतिकलय इत्यर्थः। विघाते विघातकारणे उपसा
दिते कालेन प्रापिते सति। तदेवाह। पर्जन्य इत्यादिना॥ ११॥ पर्जन्यः शतवर्षाणि यदा राजन्न
वर्षति। तदा निरन्ने ह्यन्योन्यं भक्ष्यमाणाः क्षुधार्दिताः। क्षयं यास्यंति शनकैः कालेनोपद्रुताः प्रजाः॥
१२॥ सामुद्रं दैहिकं भौमं रसं सांवर्तको रविः। रश्मिभिः पिबते घोरैः सर्वं नैव विमुंचति॥ १३॥ सामु
द्रादिकं सर्वं सांवर्तको रविः पिबते आकर्षति॥ १४॥ ततः सांकर्षणो वह्निः संकर्षणमुखोत्थि
तः॥ दहत्यनिलवेगोत्थः शून्यान्भूविवरानथ॥ १५॥ अनिलवेगोत्थः वायुवेगोद्भूतः अनिलवे

गोवाइनिपाठे अनिलेनवेगोयस्यसा। रविणां रश्मिभिः पीतमुदकंचदहती यथा। नविवरा
न्पातालादीन् अन्यान् किरणादिति पाठस्तु हिरसाकर्षणान्प्राणिरहितान्॥ छ॥ उपर्य
धः समंताच्छिखाभिर्वह्निस्तुर्ययो॥ दह्यमाने विनाल्यंडं दग्धगोमयपिंडवत्॥ २२॥ शिखा
भिर्ज्वालाभिः॥ छ॥ ततः प्रचंडपवनो वर्षाणामधिकं शतं। परं सांवर्त्तको वाति धूम्रं खं रज
सावृतं॥ १२॥ किंचिदधिकं वर्षाणां शतं सावर्त्तको वायुर्वाति। तदा रजसा हृतं खं धूम्रं नवति।
छ॥ ततो मेघकुलान्यंग चित्रवर्णान्यनेकधा। शतवर्षाणि वर्षंति नदंति रजसस्वनैः॥ २२॥
रजसस्वनैस्तीव्रगर्ज्जितैः॥ ततएकोदरं विश्वं ब्रह्मांडविवरांतरं। तदाऽऽमेगंधगुणंग्रसंत्याप
उदप्लवे॥ २३॥ ब्रह्मांडविवरांतरं ब्रह्मांडविवरमध्यगतं विश्वंएकोदकेएकार्णवव्याप्तंनव भा०टी० २२

ति। उदप्लवेउदकेनाप्लवनेसति॥ छ॥ ग्रस्तगंधास्तु पृथिवी प्रलयत्वायकल्पते। अपां रस
मयोतेजस्तालीयंते यनीरसा॥ २४॥ प्रलयत्वायचनाशाय। छ॥ ग्रसतेतेजसोरूपं वायुस्तद्
हितं रसं। लीनी लयेचानिलोतेजो वायोः खंग्रसतेगुणं॥ २५॥ सवैविशतिखं राजन्ततस्त
नं सोगुणं। शब्दग्रसति भूतादिर्नभस्तमनुलीयते॥ २६॥ तेजसश्चेंद्रियाणां गदेवान्वे
कारिको गुणै॥ २६॥ भूतादिस्तामसोहंकारः। गुणैर्द्विभिः सह॥ छ॥ महान्ग्रसत्यहंकारं
त्वादयश्चतंउ — गुणान्सचोदितं॥ २७॥ अव्याकृतंप्रधानं। तस्य उत्पाया नास्तीत्याह। नतस्येति। छ॥ नत
स्यकालावयवैः परिणामादयोगुणा। अनाद्यनंतमव्यक्तं नित्यंकारणमव्ययं॥ २८॥ काला
वयवैः अहोरात्रादिभिः गुणाः भावविकाराः। परिणामः विपरिणामः। अव्यक्तं अस्तित्वविका
ग्रसतेव्याकृतंराजन्गुणान्कालेनचोदितं॥ १७॥ ३

रमनन्यं। नित्यं सर्वदिकरूपं। ह्रासवृद्धिरहितमित्यर्थः। अव्यक्तं च परस्य अनन्यं। सर्वत्र हेतु॥
कारणमिति। किंच वागादिगोचरस्य विकारान्न वंति इदं तु नपेत्याह। न यत्रेति द्वाभ्यां॥ ॥ न
यत्र वाचो न मनो न सत्वं तमो रजो वा महदादयो मी। न प्राणबुद्धीन्द्रियदेवता वा न सन्निवेशः
खलु लोककल्पः॥१९॥ लोककल्पः लोकरूपः संनिवेशः रचनाविशेषः। न स्वप्नजाग्रच्च
च तसुषुप्तं न खं जलं न रनिलोग्निरर्कः। संसुप्तवच्छून्यवदप्रतर्क्यं तन्मूलभूतं पदमाम
नंति॥२०॥ स्वप्नजाग्रतं स्वप्नजागरावस्थायुक्तं सुषुप्तवत् इंद्रियाद्यभावात् अन्यमदृशेदे
तु। अप्रतर्क्यं। न पुनः शून्यमेवेत्याह। तदिति। उपसंहरति। लयइति॥ ॥ लयः प्राकृति
कोशेषस्तु रूपाव्यक्तयोर्यदा। शक्तयः संप्रलीयंते विवशाः कालविद्रुताः॥२१॥ शक्तयः सत्वा

दा० टी० २२

दयः। आत्यंतिकं लयमाह। बुद्धीन्द्रियेति द्वादशभिः॥ ॥ बुद्धीन्द्रियार्थरूपेण ज्ञानं भाति त
दाश्रयं। दृश्यत्वाव्यतिरेकाभ्यां आद्यंतवदवस्तु यत्॥२३॥ आत्यंतिकलयो मोक्षः। स च ब्रह्म
ज्ञानेन सर्वप्रपंचलयात्मकः। न च प्रपंचस्यात्मवस्तुत्वे लयः संभवतीति ज्ञानरूपात्ब्र
ह्मणः पृथक्तस्याः सत्वमुपपादयति। बुद्धिश्च इंद्रियाणि च अर्थाश्च तेषां ग्राहककरणग्रा
ह्यरूपेण तेषामाश्रयं आत्मा। ज्ञानमेव भाति न पृथक् तत्र हेतुमाह। दृश्यत्वाव्यतिरेकाभ्यां
मिति अतो यदाद्यंतवत्तदवस्तु यथैवं प्रयोगः। विमतं मिथ्या भवति दृश्यत्वात् कारणाव्यतिरे
कात् आद्यंतवत्वाच्च रज्जुसर्पादिवत्। तत्राव्यतिरेकं दृष्टांतेन प्रपंचयति। दीपइति॥ ॥ दीप
श्चक्षुश्च रूपं च ज्योतिषो न पृथग्भवेत्। एवं धीः खानि मात्राश्च न स्युरन्यतमादृते॥२४॥ दीपश्च

स्तुरूपाणां तेजोविशेषाणां यथा तेजसो न व्यतिरेकः॥ तथार्थाः कश्रीः खनिकरणनिमाणावि
षयाः स्वस्वनामत्वकारणात् ब्रह्मणः पृथक् न सन्तु॥ ब्रह्मकार्यत्वात्। नन्वेवं कार्यकारणयो
र्नेदे कार्यासत्वे कारणस्याप्यसत्वं प्रसज्येत। तत्राह। अनन्यत्वमादिति। कार्यादत्यंतव्यतिरि
क्तो ब्रह्मणः प्रपंचात् ब्रह्मणोस्ति व्यतिरेकः॥ प्रपंचस्य तु ततो नास्ति व्यतिरेकः। तथा हि। स
त्यस्य सत्त्वनावस्य कापि नानात्वं उपलभ्यते। यदि सच्चिद्रूपस्य नानात्वं ज्ञानं त्वविद्वांसाः॥ त
र्हि यथा घटकरकाकाशयोः॥ नानात्वं उपाधिव्यतिरेकेण नास्ति। तथा। ननु यदा नु बुद्धेरसत्वं
तदा तदवस्थानां सुतरामसत्वमित्याशयेनाह। बुद्धेरिति॥ ०॥ बुद्धेर्जागरणं स्वप्नः सुषुप्ति पा०टी०
रिति चोच्यते। मायामात्रमिदं राजन् नानात्वं प्रत्यगात्मनि॥२४॥ ननु विश्वतैजसप्राज्ञानां नाश्र २४

वस्थानबुद्धेरित्याशंक्याह। मायामात्रमिति। इदं विश्वतैजसप्राज्ञरूपं चाद्यंतवत्वादित्यस्याहे
तोः असिद्धिमाशंक्य सावयवत्वेन साधयति। यथेति॥ ०॥ यथा जलधरा व्योम्नि न वंति न नवं
ति च। ब्रह्मणीदं तथा विश्वमवयव्युदयाप्ययात्॥२५॥ अवयवीति। यत्सावयवं तत् आद्यंत
वत् घटादिवदित्यर्थः। अतउदयाप्ययात् आद्यंतवत्वात् विश्वं सन्न नवतीत्यर्थः। यद्वा पृथग्
वस्थागमापायित्वाद्विश्वं मिथ्या। ब्रह्म तु तदवधित्वात् सत्यमित्यनेन साध्यते। दृष्टांतस्तु प्र
वैकृएव। यथा जलधरा व्योम्नि इति दृष्टांतस्त्वागमापायितदवधित्वमात्रेन तु मिथ्यात्व इति
प्रतिज्ञानं कारणस्य सत्यत्वमुपपादयति सत्यमिति॥ ०॥ सत्यं ह्यवयवः प्रोक्तः सर्वावयवि
नामिह। विनार्थेन प्रतीयेरन् पटस्येवांगतंतवः॥२६॥ अवयवः कारणं प्रोक्तः वाचारंभणं वि

कारेण नामधेयं मृत्तिकेत्येव सत्यमित्यादिश्रुतिभिः॥ अत्र युक्तिमपि दर्शयति। विनार्थेनेति।
अंगहेराज्जुर्न हि यस्मात् अर्थेन अवयविना विना पृथगवयवाः प्रतीयेरन्। यथा पटस्या
वयवाः तंतवः पटात् पृथक् प्रतीयंते। तद्वदिति। ननु कार्याभावे कारणत्वं ब्रह्मणः कुतो घटे
नासत्वं। तदपि कारणत्वमपि नातीव सत्यमित्याह। यदिति॥ मू॥ यत्सामान्यविशेषाभ्यां उप
लभ्येत सत्तम॥ अन्योन्यापाश्रयात् सर्वमाद्यंतवद्वस्तु यत्॥ २७॥ यदिति सामान्यं कारणं।
विशेषः कार्यं। तद्रूपेण अन्योन्यापाश्रयात् परस्परापेक्षत्वेन नित्यत्वेन निरूपणासत्त्वादित्यर्थः। वा० टी०
अतः कारणत्वमवधित्वं व्यापकत्वमित्यादिकमपि परस्परापेक्षत्वात् आद्यंतवत् तत्सर्वम २५
वस्त्वित्यर्थः॥ यद्वा। तच्चैव देहत्वं तरमेव तत्। यदुपलभ्येत सत्तम॥ सामान्यविशेषरूपत्वात्

स्वप्नवत्। अन्योन्यापाश्रयादितीदमपि देहत्वं तरं गुणगुणि विशेषणविशेष्यव्याप्यव्याप
कत्वादिरूपेण परस्पराधीनसिद्धित्वात्। तथा च तत्स्वप्नवत् इति निगमनं। अतो यदाद्यंत
वत् तत्सर्वमवस्त्विति। तदेवमनेकैर्हेतुभिः॥ प्रपंचस्यासत्त्वं साधितं। ननु प्रपंचस्यापि प्र
काशमानत्वादात्मवत्सत्त्वं किं न स्यादिति तत्राह। विकार इति॥ मू॥ विकारः ख्यायमानोऽपि
प्रत्यगात्मानमंतरा। ननुरूप्योऽस्त्वणुरपि स्याच्चेच्चित्समश्चात्मवित्॥ २८॥ ख्यायमानः प्र
काशमानोऽपि विकारः प्रपंचः॥ प्रत्यगात्मप्रकाशं विना अणुमात्रोऽपि न निरूप्योऽस्ति।
तं विना निरूप्यः स्याच्चेत्तर्हि सोऽपि चित्समः स्यात्। चिद्रूपेणात्मना समः स्वप्रकाशो भवेत्। त
था च सति सोऽप्यात्मवत् स्यात्। एकरूपः स्यादित्यर्थः। कुत इत्यत आह। नहीति। नहि सत्य

स्य नानात्वमविद्वान् यदि मन्यते। नानात्वं छिद्रयोर्यद्वत् ज्योतिषोर्वानयोरिव॥ १९॥ ननु सत्यस्या
प्यात्मनो जीवब्रह्मरूपं नानात्वमस्त्येव। तत्राह। यद्येवं नानात्वं मन्यते। तर्ह्यविद्वान्। कथं
तर्हि तयोर्भेदव्यवहारः। उपाधिकृत इत्याह। नानात्वमिति। यथा छिद्रयोः घटाकाशमहा
काशयोरिति। परिच्छेदापरिच्छेदे दृष्टांतः। ज्योतिषोः आकाशस्थजलस्थसूर्ययोरिवेत्युपाधि
कृतपरिच्छेदः। सदसद्भावे वानयोरिव। यथा समनयोर्वानयोः जीवात्मनोः बाह्यशरीरस्थवा
य्वोरिवेति। क्रियाभेदेन ब्रह्मण एव प्रपंचव्यवहारात्वं वनत्वं दृष्टांतेन स्पष्टयति। यथेति। य
था हिरण्यं बहुधा समीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु। एवं वचोभिर्भगवानधोक्षजो
व्याख्यायते लौकिकवैदिकैर्जनैः॥ २०॥ यथा हिरण्यं क्रियाभिस्तत्तद्वनाभेदैः बहुधा क

हा०टी० २१

टककुंडलादिरूपेण यथा भेदः। तथा लौकिकवैदिकैर्वचोभिः जनैरहंकारोपहितः॥
नन्वहंकारस्य कथं ब्रह्मरूपावरणेन भेदव्यवहारहेतुत्वं। तस्य स्वकारणभूतब्रह्मा
वरकत्वासंभवात् आवरणे वाऽपि प्रकाशासंभवादित्याशंक्य दृष्टांतेन स्पष्टयति॥ य
यथा घनोऽर्कप्रभवोऽर्कदर्शितो ह्यर्कांशभूतस्य च चक्षुषस्तमः। एवं त्वहं ब्रह्मगुण
स्तदीक्षितो ब्रह्मांशकस्यात्मन आत्मबंधनः॥ २१॥ अर्करश्मय एव मेघरूपेण प
रिणताः वर्षंति। अग्नौ प्रास्ताहुतिः सम्यक् आदित्यमुपतिष्ठति। आदित्याज्जायते
वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥ इति वचनात्। तस्मादर्कप्रभवः अर्केणैव दर्शितः प्रका
शितश्च घनः अर्कांशभूतस्य च चक्षुषः अर्कदर्शनं प्रति प्रतिबंधको भवति। एवं अहं

कारः अल्पगुणः अल्पकार्यत्वेन । तदीक्षिता तेनैव प्रकाशितस्य आत्मनो जीवस्य आत्मबंध
नः अप्रसुत्वरूपदर्शनं प्रतिप्रतिबंधको भवति । अतएव अहंकारनाशे स्वस्वरूपदर्श
नं भवतीति । तेनैव दृष्टांतेनाह । घनइति ॥ छ ॥ घनो यदार्कप्रभवो विदीर्यते चक्षुःस्व
रूपं रविमीक्षते तदा । यदा ह्यहंकार उपाधिरात्मनो जिज्ञासया नश्यति तर्ह्यनुस्मरेत् ।
३२ ॥ आत्मनः उपाधिजिज्ञासया विचारेण तर्हि तदा अनुस्मरेत । ब्रह्माहमिति पश्यतीत्य
र्थः ॥ सोऽयमात्यंतिकप्रलयः प्रत्युपसंहरति । यदैवेति ॥ छ ॥ यदैवमेतेन विवेकहेतिना भा॰टी॰ २७
मयामयाहंकरणात्मबंधनं । छित्वाच्युतात्मानुभवोऽवतिष्ठते तमाहुरात्यंतिकमं
गसंप्लवं ॥ ३३ ॥ विवेकहेतिना ज्ञानशस्त्रेण अहंकरणमेवात्मबंधनं छित्वा अच्युतं

परिपूर्णं आत्मानमनुभवतीति तथा नित्यप्रलयमाह । नित्यदेति ॥ छ ॥ नित्यदा सर्वभूता
नां ब्रह्मादीनां परंतप । उत्पत्तिप्रलयावेके सूक्ष्मज्ञाः संप्रचक्षते ॥ ३४ ॥ ऊतइत्यत आ
ह कालेति ॥ छ ॥ कालस्रोतोजवेनाशु ह्रियमाणस्य नित्यदा । परिणामिनामवस्थास्ता
जन्मप्रलयहेतवः ॥ ३५ ॥ परिणामिनां । नदीप्रवाहदीपज्वालादीनां या उच्चनीचावस्था
नाः कालरूपस्रोतसो वेगेनाशु ह्रियमाणस्य देहात् देहादेर्दृश्यमानाः तद्वदेव नि
त्यदा जन्मप्रलयहेतवो भवंति । देहः प्रतिक्षणध्वंसी । प्रतिक्षणं अवस्थाभेदस्य विद्य
मानत्वात् प्रदीपादिवदित्यनुमानं । यदि प्रतिक्षणं अवस्था भवंति । तर्हि किं न दृश्यंते ।
अतो हेतुरसिद्धः इत्याशंक्याह । अनादीति ॥ छ ॥ अनाद्यंतवतानेन कालेनेश्वरवर्त्मना ।

अवस्था नैव दृश्यंते वियति ज्योतिषामिव ॥ ३६ ॥ अनाद्यंतवता कालेन जायमाना अवस्था नै
व लक्ष्यंते । यथा आकाशे गच्छतां ज्योतिषां चंद्रादीनां गमनावस्थाविशेषा यथा नैव लक्ष्यं
ते तद्वत् । अतो यथा तेषां देशांतरप्राप्त्या निरूपणं गत्यावस्थाः कल्प्यंते । तद्वदत्रापि वास्य
ता रूप्यादिदर्शनेन मध्यावर्त्तिन्यो वस्थाः कल्प्यंते । इति न हेत्वसिद्ध इत्यर्थः ॥ उपसंह
रति ॥ छ ॥ नित्यो नैमित्तिकश्चैव तथा प्राकृतिको लयः ॥ आत्यंतिकश्च कथितः कालस्य
गतिरीदृशी ॥ ३७ ॥ पुराणार्थमुपसंहरति । एता इति ॥ छ ॥ एताः कुरुश्रेष्ठ जगद्विधातु
र्नारायणस्याऽखिलसत्वधाम्नः ॥ लीलाकथास्ते कथिताः समासतः कार्त्स्न्येन नाजोऽप्यभि भा॰ टी॰
धातुमीशः ॥ ३८ ॥ लीला विषयाः कथाः समासतः संक्षेपतः ॥ अजो ब्रह्मापि कार्त्स्न्येन अभि २८

धातुं न ईशः समर्थः ॥ न तु साकल्येन अभिधातुं न शक्यं तर्हि तच्छ्रवणेन कथनेन वा किं
नेत्याह ॥ छ ॥ संसारसिंधुमतिदुस्तरमुत्तितीर्षोर्नान्यः प्लवो भगवतः पुरुषोत्तमस्य ली
लाकथारसनिषेवणमंतरेण पुंसो भवेद्विविधदुःखदवार्दितस्य ॥ ३९ ॥ विविधं दृष्ट
वियोग अनिष्टसंयोगलक्षणं दुःखमेव दवो दावानलः । तेन अर्दितस्य पीडितस्य अ
त एव संसारसिंधुमुत्तितीर्षोः उत्तरीतुमिच्छोः पुंसः भगवतो या लीलाकथाः अवता
रचेष्टितं तदेव रसः तन्निषेवणमंतरेण प्लवः तरणसाधनं न भवेत् । संसाररूपाचिकित्स
व्याधिनाशे उपायांतरासंभवात् तत्कथाश्रवणमेव यथाशक्ति निषेव्यमित्यर्थः ॥ श्रोत्
रादरदार्ढ्यायसंप्रदायप्रवृत्तिमाह । पुराणसंहितामिति त्रिभिः ॥ छ ॥ पुराणसंहितामे

ताम्रषिर्नारायणोऽव्ययः॥ नारदायपुराप्राह कृष्णद्वैपायनायसः॥४०॥ सनारदः॥छ॥ सवै
मह्यंमहाराज भगवान्बादरायणः॥ इमांभगवतीप्रीतः संहितांवेदसंमितां॥४१॥ सवैबा
दरायणः प्रीतः सन्मह्यंइमांसंहितांप्राहेति पूर्वेणान्वयः॥छ॥ एतांवक्ष्यत्यसौसूतः ऋषि
भ्योनैमिषालये। दीर्घसत्रेकुरुश्रेष्ठ संपृष्टः शौनकादिभिः॥४३॥ असौसूत इतिपुरःस्थि
तमंगुल्यानिर्दिश्याह। नैमिषालयेनैमिषारण्यस्थाने॥ ॥छ॥ ॥इतिश्रीभागवतेमहा
पुराणेद्वादशस्कंधेचतुर्विधप्रलयकथनेचतुर्थोऽध्यायः॥छ॥ ॥पंचमेतुसमासेनप द्वा० टी०
रब्रह्मोपदेशतः। राज्ञस्तक्षकसंदंशात्मृत्युभीतिनिराकरणं। एतत्पुराणंश्रृण्वन्नभयं २९
प्राप्नोतीत्यभिप्रेत्यपुराणार्थमनुस्मारयति॥ श्रीशुकोवाच॥ ॥अत्रानुवर्ण्यतेऽभीक्ष्णं

विश्वात्माभगवान्हरिः। यस्यप्रसादजोब्रह्मारुद्रःक्रोधसमुद्भवः॥२॥ अयंभाव। भगवतः
कर्त्ताब्रह्मापियस्यप्रसादजः। प्रसादोवरजोवृत्तिर्हर्षः। ततोज्ञानत्वात्परतंत्रः। यःसंहर्त्तारु
द्रश्चयस्यक्रोधसंभवोनतुस्वतंत्रः। सविश्वस्यात्मानियंताभगवान् अत्रश्रीमद्भागवते
प्रतिश्लोकंप्रतिपदंअनुवर्ण्यते। एतदेवंभूतंश्रीभागवतंशृण्वतः कुतोऽन्यस्माद्भयं
केति। त्वंतुपुनःकृतार्थएवेत्यनुस्मारयति। त्वमिति॥छ॥ त्वंतुराजन्मरिष्येतिपशुबुद्धिमि
मांजहि। नजातःप्रागभूतोऽद्यदेहवत्त्वंननंक्ष्यसि॥२॥ पशुबुद्धिंअविवेकं। यस्मान्नत्वंनंस
सि। भगवन्मरणभयंदुस्त्यजमितिमममतिः। इतिचेत्तत्राह॥छ॥ नजातइति। देहवन्
प्राग्भूतःअग्रजातोनत्वंनचदेहवद्विनंक्ष्यसि। नतुबीजांकुरवत्तस्यतस्मात्पुत्ररूपे

णत्वमेव न भवति। देहे तथा च स्मृतिः। अंगादंगात्संभवसि हृदयादधिजायसे। आत्मा वै पुत्रना
मासि स जीव शरदः शतमिति। ततः पुनरंकुराद्बीजमिव पौत्ररूपेण पित्वयमेव भवति
। पिता पुत्रेण पितृमानिति श्रुतिः। अनंतं पुनर्भयं कथं भविष्यामीति। चेत्तत्राह। न भवि
ष्यसीति॥ ३॥ न भविष्यसि त्वं पुत्रपौत्रादिरूपवान्। बीजांकुरवद्देहे व्यतिरिक्तो
यथा नभः॥ ३॥ त्वं पुत्रपौत्रादिरूपवान् बीजांकुरवन्न भवसि। यस्माद्देहाद्व्यतिरि
क्तस्त्वं। यथा नभः काशात्। देहाद्देहो जायते नात्मेति भावः। जन्मादीनां देहधर्मत्वं दृष्टांते पा० टी०
न स्पष्टयति। स्वप्नेति। ३॥ स्वप्ने यथा शिरश्छेदः पंचत्वाद्यात्मनः स्वयं। यस्मात्पश्यसि देहस्य ३०
ततस्त्वात्माप्यजोऽमरः॥ ४॥ स्वप्ने यथा आत्मनः शिरश्छेदं स्वयं पश्यति। एवं जागरणेऽपि यस्मा

द्देहस्य पंचत्वादिकं पश्यति। तद्देवात्मनः इदं भ्रममात्रं। वस्तुतस्त्वात्मा ह्यजतोऽमरश्चेत्यर्थः।
तदुक्तं। आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ न भवाप्ययवस्तूनामभिज्ञो द्वयलक्षणः।
इत्यादि। तस्माद्देहोपाधिकोयमात्मनो जन्मादिसंसारभ्रमः तस्मादुपाधिनिवृत्तौ मुच्यत
इति। सदृष्टांतमाह। घट इति॥ ३॥ घटे भिन्ने यथाकाश आकाशः स्याद्यथा पुरा। एवं देहे मृते
जीवो ब्रह्मसंपद्यते पुनः॥ ५॥ यथा पुरा घटोपाधेः पूर्वमेव पुनर्घटे। भग्ने तदंतर्वर्त्याकाश
आकाश एव स्यात्। तथा एवं देहे मृते तत्त्वज्ञानेन लीने सति ज्ञाने स्वयं संभावयितुं मायात्म
तमात्मनो देहाद्युपाधिसंबंधप्रकारमाह। मन इति। ३॥ मनः सृजति वै देहान् गुणान्क
र्माणि चात्मनः॥ तन्मनः सृजते माया ततो जीवस्य संसृतिः॥ ६॥ मनः आत्मनो देहादीन् सृज

ति। मनः सर्वकर्मप्रेरितं गुणान् सत्त्वादीन् सृजति। मनःश्वर्वकर्मप्रेरितं गुणान् सत्त्वादीन्
सृजति। पर्यायेण विनाशयति। ततो गुणमय्याद्युपाधिसमुदायात् जीवस्य संसृतिः न स्वतः॥ य
स्मादुपाधिनिबंधनो जीवस्य संसारः तन्नाशे जीवत्वं गच्छतीति एतदेव सदृष्टांतमाह। साहन
स्नेहेति॥ ७॥ स्नेहाधिष्ठानवर्त्यग्निसंयोगो यावदीयते। ततो दीपस्य दीपत्वमेवं देहकृतो भवः॥
७॥ दीपस्य ज्योतिषः दीपत्वं ज्वालारूपपरिणामः॥ तत्र तैलस्थानीयं कर्म तदधिष्ठानस्थापनीयं
मनः॥ वर्त्तिस्थानीयो देहः॥ अग्निसंयोगस्थानीयश्चैतन्याभासः॥ दीपस्थानीयसंसार इति योज्यं दे
हकृतः देहनिबंधः यद्वा देहकृतो मनसः तच्चात्मनः॥ ७॥ रजःसत्त्वतमोवृत्त्या जायतेऽथ विप — वा० टी० ३१
श्यति। न तच्चात्मा स्वयंज्योतिः यो व्यक्ताव्यक्तयोः परः॥ ८॥ अतो दीपवत्संसार एव नश्यति। व

नत्वात्मा ज्योतिर्विदित्याह। नेति। ननु तत्र प्रतीयमान आत्मा कुत इत्यत आह। य इति। व्यक्ता
व्यक्तयोः स्थूलसूक्ष्मदेहयोः परः अन्यः यतः स्वयंज्योतिः परत्वं प्रपंचयति। ७॥ आकाश
इव चाधारो ध्रुवोऽनंतोपमस्ततः। एवमात्मानमात्मस्थमात्मनैवामृश प्रभो। बुद्ध्यानुमान
गर्भिण्या वासुदेवानुचिंतया॥ ९॥ आधारो देहादिप्रपंचस्य ध्रुवो निर्विकारः नास्त्यंत उपमा
च यस्यासौ अनंतोपमः॥ ततः विनु। अतस्त्वमेवं चिंतयेत्याह। एवमिति। आत्मस्थं देहाद्युपा
धिस्थितं चामृश विचारय। अनुमानगर्भिण्या दृग्दृश्यान्वयव्यतिरेकयुक्त्या एवं सति तं
तक्षको न दहेदित्याह। चोदित इति॥ ७॥ चोदितो विप्रवाक्येन न त्वां धक्ष्यति तक्षकः। मृत्य
वो नोपधक्ष्यंति मृत्यूनां मृत्युमीश्वरं॥ १०॥ मृत्यवो मृत्युहेतवः। विमर्शप्रकारं दर्शयन् तत्स

कादर्शनं दर्शयति द्वाभ्यां ॥ छ ॥ अहं ब्रह्म परं धाम ब्रह्माहं परमं पदं । एवं समीक्षन्नात्मानमा
त्मन्याधाय निष्कले ॥ ११ ॥ सोहं स ब्रह्मैव । यद्ब्रह्म तदहमेवेति समीक्षेत तथाहं ब्रह्मेति ना
वनया जीवस्य स्तोकादि निवृत्तिः ब्रह्माहमिति नावनया च ब्राह्मणः परोक्षं निवृत्ति
र्नवतीति व्यवहारो दर्शितः । निष्कले निरुपाधौ आत्मनि ब्रह्मणि ॥ छ ॥ दशंतं तक्ष
कं पादे लेलिहानं विषाननैः । न द्रक्ष्यसि शरीरं च विश्वं च पृथगात्मनः ॥ १२ ॥ विषयु
क्तैराननैर्दशंतं ग्रसंतं लेलिहानं सर्पं । यद्वा लेलिहानं जिह्वया उष्ठजांतं स निःशेष
मास्वादयंतं । आत्मनः पृथक् ॥ छ ॥ प्रसादाद्वैव विश्वामात् विष्णोश्चैव गुरोस्तथा । ए भा० टी०
तत्ते कथितं तात यन्मां त्वं परिपृच्छसि ॥ १४ ॥ हरेश्चेष्टां । आत्मा त्वं । यत्पृष्टवान् तदेतत्ते ३२

कथितं । शिष्यस्य स्वतात्पर्यपरीक्षणाय पृच्छति किमिति ॥ छ ॥ ॥ इति श्रीभागवते महापुराणे
द्वादशस्कंधे प्रलयप्रमाणलक्षणं नाम पंचमोऽध्यायः ॥ ॥ षष्ठे परीक्षितो मोक्षः सर्पहो
मादितक्षुनाऽभूत् । वेदशाखाविभागोक्तौ त्रिवेदि व्यासवर्णनं ॥ छ ॥ ॥ एतन्निशम्य मुनिना
भिहितं परीक्षिद्व्यासात्मजेन निखिलात्मदृशा समेन । तत्पादपद्ममुपसृत्य नतेन मूर्ध्नां
जलिरिदमाह स विष्णुरातः ॥ १ ॥ एतत्पुराणं श्रीभागवतं निशम्य निखिलात्मा हरिस्तं प
श्यति निखिलं चात्मनि पश्यंतीति तथा तेन । समेन । नतेन च अवनतेन मूर्ध्ना तस्मा
द्व्यासमुपसृत्य तस्य पादौ शिरसि निधाय विष्णुरातस्तं ब्रह्मरातं प्राह ॥ राजोवाच ॥
सिद्धोऽस्म्यनुगृहीतोऽस्मि भवता करुणात्मना । श्रावितो यच्च मे साक्षादनादिनिधनो हरिः

रिः॥२॥ सिद्धः कृतार्थोस्मि। यतः अनुगृहीतोस्मि। अनुग्रहमेवाह। यत् यस्मात् श्रावितः चश
ज्ञात आत्मसाधनं च निरूपितं। करुणात्मना। निनं दर्तिदाप्यां। नान्यत्कृतमिति॥छ॥ नान्
दुः न तमहं मन्ये महतामच्युतात्मनां। अज्ञेषु तापतप्तेषु भूतेषु यदनुग्रहः॥३॥ पुराण
संहितामेतामश्रौष्मं भवतो वयं। यस्यां खलूत्तमश्लोको भगवाननुवर्ण्यते॥४॥ अश्रौष्म
श्रुतवंतः भवतः सकाशात् सिद्धोस्मीत्युक्तं तदेवाविः करोति भगवन्निति॥छ॥ भगवंस्त
त्तकादिभ्यो मृत्युभ्यो न बिभेम्यहं। प्रविष्टो ब्रह्मनिर्वाणमभयं दर्शितं त्वया॥५॥ यतस्त्व
याद्दर्शितं ब्रह्म प्रविष्टः। कथंभूतं ब्रह्म अभयं। यतो निर्वाणं विकस्य रूपं। किं भूयः श्रो द्वा०टी० २३
तुमिच्छसीति यदुक्तं। तत्र सिद्धोहं न किंचित् श्रोतुमिच्छामीत्युक्त्वाह षष्ठ्या न ... दकं वः सन्

अनुज्ञां केवलं देहीत्याह॥छ॥ अनुजानीहि मां ब्रह्मन् वाचं यच्छाम्यधोक्षजे। मुक्तका
माशयं चेतः प्रवेश्य विसृजाम्यसून्॥६॥ वाचमित्युपलक्षणं सर्वेंद्रियाणां। ननु वाचं नि
यम्य किं करिष्यसि तत्राह। मुक्ताः कामाशया लक्षणासनायेन तच्चेतः अधोक्षजे प्रवेश्य
असून् विसृजामि॥छ॥ अज्ञानं च निरस्तं मे ज्ञानविज्ञाननिष्ठया। भवता दर्शितं क्षेमं
परं भगवतः पदं॥७॥ ननु किं प्रमाणस्यागेन। किंचित्कालं ज्ञाननिष्ठेन भवेति। तत्राह। च
कारात्संस्कारश्च। तच्च लवतरूपयैवेत्याह। भवतेति॥छ॥ इत्युक्तः समनुज्ञाय भग
वान् बादरायणिः। जगाम भिक्षुभिः साकं नरदेवेन पूजितः॥८॥ परीक्षिदपि राजर्षिरा
त्मन्यात्मानमात्मना। समाधाय परं दध्यावस्पंदासुर्यथा तरुः॥९॥ आत्मना बुद्ध्या आत्मानं

मनः आत्मनि प्रत्यक्प्रकाशेन समाधाय परमात्मानं दध्यौ। अस्पंदासुधीर्न प्राणः। यथा
तरुः स्थाणुं तमेव विवेशिनष्टि॥ छ॥ प्राक्कूले बर्हिष्यासीनो गंगाकूल उदङ्मुखः। ब्रह्मभू
तो महायोगी निःसंगश्छिन्नसंशयः॥२०॥ प्राक्कूले प्रागग्रे बर्हिषि दर्भेषु। तदेवं ब्रह्मभूते त
स्मिन् तक्षकागमनादिकं पिष्टपेषणमिवानवदि निदर्शयति। तक्षक इति त्रिभिः॥२१॥
तक्षकः प्रहितो विप्राः क्रुद्धेन द्विजसूनुना। हंतुकामो नृपं गच्छन् ददर्श पथि कश्यपं।
२१॥ हे विप्राः तं विषचिकित्सया परीक्षिद्रक्षणेन द्रव्यार्जनाय गच्छंतं॥ छ॥ तं तर्पयित्वा द्र
विणैः निवर्त्य विषहारिणं। द्विजरूपप्रतिच्छन्नः कामरूपोऽदशन्नृपं॥२२॥ तत्र स्थालीठ
वृक्षस्य भस्मीभूतस्य पुनरंकुरितादिक्रमेणोत्थापनात् विषहारिणं तदपेक्षितद्रवि भा॰टी॰ ३४

णैः संतर्प्य ततो निवर्त्य द्विजरूपेण तिरोहितः सन्नदत। पुत्रस्यमिवजातमित्याह। ब्र
ह्मभूतस्येति। छ॥ ब्रह्मभूतस्य राजर्षेः देहोहिगरलाग्निना। बभूव भस्मसात्सद्यः पश्य
तां सर्वदेहिनां॥२३॥ तत्र क्षणं सर्वेषां दुःखं ततः परमुत्सवं चाह। द्वाभ्यां। हाहाकार इति
छ॥ हाहाकारो महानासीत् भुवि खे दिक्षु सर्वतः। विस्मिता ह्यभवन् सर्वे देवासुरनरादयः॥
॥२४॥ देवदुंदुभयो नेदुर्गंधर्वाप्सरसो जगुः। ववर्षुः पुष्पवर्षाणि विबुधाः साधुवादिनः॥
२५॥ प्रासंगिकमाह॥ जनमेजय इत्यादि॥ छ॥ जन्मेजयः स्वपितरं श्रुत्वा तक्षकभक्षितं।
यथाजुहाव संक्रुद्धः सर्पान् सत्रे सह द्विजैः॥२६॥ सर्पान्निचारमत्रे द्विजैः सह वर्त्तमानः य
थावत् आजुहाव जुहावेति वा। सर्वसर्पाबाहनेकारणमाह। संक्रुद्ध इति॥ छ॥ सर्पसत्रे

समिद्धाग्नौ दह्यमानान् महोरगान्। दृष्ट्वेंद्रं भयसंविग्नस्तक्षकः शरणं ययौ॥ १७॥ अपश्य
न् तक्षकं तत्र राजा पारीक्षितो द्विजान्। उवाच तक्षकः कस्मान् नगद्येतोरगाधमः॥ १८॥
कस्मात्तक्षको न दह्येत तेनुक्ताः स तो द्विजा ऊचुः। तं गोपायति राजेंद्र शक्रः शरणमागतं।
तेन संस्तंभितः सर्प्पः तस्मान्नाग्नौ पतत्यसौ॥ १९॥ तेनइंद्रेण श्रेसौ तक्षकः॥ ॐ॥ पारीक्षित
इति श्रुत्वा प्राह त्विजउदारधीः॥ सहेंद्रस्तक्षको विप्रा नाग्नौ किमिति पात्यते॥ २०॥ त्त्विज
प्रतिप्राह राजा॥ सहेंद्रः इंद्रसहितः किमिति न पात्यते॥ ॐ॥ तच्छ्रुत्वा जुहुवुर्विप्राः सहेंद्रं त द्वा०टी०
क्षकं मखे। तक्षकाशु पतस्वेह सहेंद्रेण मरुत्वता॥ २१॥ तद्राज्ञो वचः श्रुत्वा आजुहवु ३५
स्तक्षेपमाह्वानं दर्शयति। तक्षकेति। इहाग्नौ अनुपत। मरुत्वता मरुद्गणवता इंद्रेण सह।

ॐ॥ इति ब्रह्मोदितासेपैः स्थानादिंद्रः प्रचालितः॥ बभूव संभ्रांतमतिः सविमानः सतक्षकः॥
२२॥ ब्राह्मणैरुक्तैराक्षेपैः परुषवाक्यैः॥ ॐ॥ तं पतंतं विमानेन सह तक्षकमंबरात्। विलोक्यां
गिरसः प्राह राजानं तं बृहस्पतिः॥ २३॥ तक्षकेण सहितं अंबरात् पतंतं विलोक्य आंगिरसः
पुत्रो बृहस्पतिः प्राह॥ ॐ॥ नैष त्वया मनुष्येंद्र वधमर्हति सर्पराट्। अनेन पीतममृतं तेन चै
वाजरामरः॥ २४॥ न वइ नामाजरामरः। तथापि पितृमारकं धक्ष्यामि इति चेत्तत्राह। जीवित
मिति॥ ॐ॥ जीवितं मरणं जंतोः गतिः स्वेनैव कर्मणा। राजंस्ततोन्यो नान्यस्य प्रदाता सुखदुः
खयोः॥ २५॥ गतिः परलोकः। अतो दुर्मरणनिमित्तं पितुर्दुर्गतिरनेन कृतेत्यपि न शंकनी
यमित्यर्थः। कथं अन्यः सुखदुःखप्रदाता नास्ति। सर्पादीनामुपलभ्यमानत्वादिति चेत्त

तत्राह सर्पेति ॥ छ ॥ सर्पचौराग्निविद्युद्भ्यः क्षुत्तृड्व्याध्यादिभिर्नृप । पंचत्वमृच्छते जंतुर्भुं
क्ते आरब्धकर्म तत् ॥ २६ ॥ सर्पादिना जंतुः पंचत्वं मृत्युमृच्छति प्राप्नोतीति यदा तदा स्वयं
कर्मैव भुंक्ते । स्वकर्मप्रयुक्ता एव सर्पादयो न स्वतंत्राः ॥ इति भावः ॥ तस्मात्सर्वमिदं रा
जन्संस्थीयेताभिचारकं । सर्पा अनागसो दग्धा जनैर्दिष्टं हि भुज्यते ॥ २७ ॥ संस्थीयेत
समाप्यतां । आभिचारिकं हिंसाफलं । दिष्टं प्राचीनं कर्म्म अतः सर्पादिष्टप्रयुक्तस्य त
वाप्ययं नापराध इति भावः ॥ छ ॥ इत्युक्तः स तथेत्याह महर्षेर्मानयन्वचः ॥ सर्पसत्रादु
परतः पूजयामास वाक्पतिं ॥ २८ ॥ वाक्पतिं बृहस्पतिं । ननु कथं विदुषामप्येवं संमोहस्य
तो ब्रह्मकोपात्पारीक्षितो मृत्युः जन्मेजयकोपात्सर्पाणामित्यादि तत्राह । सैषेति ॥ छ ॥

सैषा विष्णोर्महामायाबोध्ययालक्षणा यया । मुह्यंत्यस्यैवात्मभूता भूतेषु गुणवृत्तिभिः ॥
२९ ॥ तस्याः मायायाः महत्त्वं दर्शयति । अलक्षणा अप्रतर्क्येत्यर्थः । कासावित्यत्राह ।
यया मायया अस्य विष्णोरेवात्मभूताः आत्मांशभूताः प्राणिनः गुणवृत्तिभिः क्रोधा
दिभिः भूतेषु देहेषु मुह्यंति । बाध्यबाधकतां प्रपद्यंतीत्यर्थः ॥ ननु विष्णोश्चरित्रश्रवणा
दिना बाधितया तया कुतो मोहः स्यात्तत्राह । अबाध्यया बाधितुमशक्यया । कथं तर्हि मा
यातत्कार्याणिवृत्तिरित्याशंक्य श्रीविष्णुस्वरूपनिरूपणपूर्वकं तद्भजनात्सर्वानर्थनि
वृत्तिरिति शास्त्रार्थमुपसंहरति । नयत्रेति पंचभिः ॥ छ ॥ न यत्र दंभीत्यभया विराजिता मा
यात्मवादे सकृदात्मवादिभिः ॥ न यद्विवादो विविधस्तदाश्रयो मनश्च संकल्पविकल्पवृत्ति

यत॥ ३०॥ इदं नीतिमायाकपटवानयदुमानु इत्येवं भूतायां बुद्धावसद्धिरव्यमानायामा
येत्यर्थः। सा आत्मविद्यादिः आत्मवादे क्रियमाणे नयानुनविराजिता। न प्रकाशिता। किं
तु नीतेव स्वकार्य्यमोहादिकमकुर्वती कथंचिद्वर्त्तत इति प्रतिपादिता। यद्वा। आत्मवा
दे विराजिताशोभिता। कथमित्याह। याविरुद्धानेकप्रकारेण। किंतु। आत्मस्वरूपनिरू
पणे वचनेष्वघटमानतामात्मनः संपादयंती शोभिता॥ तदुक्तं। तस्मै नमो भगवते वासु
देवाय धीमहि। यन्मायया दुर्जयया मां ब्रुवंति जगद्गुरुं। विमोहिता विकत्थंते ममाहं
मिति दुर्धियः॥ किंच। किंच यस्मिन्नात्मवादे तदाश्रयो मायाश्रयो विविधो विवादो नास्ति। भा०टी० ३७
किंच। यस्मिन्नात्मस्वरूपनिरूपणे संकल्पविकल्पात्मकं मनो नास्ति। किंच॥ छ॥ न यत्र

सृज्यं सृजतो नयोः परं श्रेयश्च जीवस्त्रिभिरन्वितस्त्वहं। न देतदुत्पादितबाध्यबाधकं निषि
ध्य चोर्म्मीन् विरमेत्स्वयं मुनिः॥ ३१॥ यत्र आत्मस्वरूपनिरूपणे त्यज्यं कर्मकर्मन प्रका
शते। सृजतोः कारकवर्गेण सहजनयोः सृज्यसृष्टोः. परं साध्यं श्रेयः फलमपि न। अ
तः सृज्यस्रष्टृफलैरन्वितो जीवश्च अहंकारात्मको यत्र नास्ति। अत एवउत्पादितो निरस्तो
बाध्यबाधको यस्मिन् अहंकारममकारादीन् निषिध्य विरमेत्। विशेषेणक्रीडेदित्य
र्थः। यतस्तदेव वैष्णवं परमामनंतीत्याह। परमिति॥ छ॥ परं पदं वैष्णवमामनंति तत
यन्नेति नेतीत्यतदुत्सिसृक्षवः। विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यावसितं स
माहितैः॥ ३२॥ यदेतन्नदेव परं पदं वैष्णवं पदं स्वरूपं आमनंति। के। ये च अतत् आत्मव्य

तिरिक्तं तच्छ्रुत्वा त्यक्तुमिच्छवः॥ यतः अनन्यसौहृदाः॥ नास्ति अन्यस्मिन् सौहृदं येषां ते॥ कु
तः॥ देहात्ययं देहाद्यहंमात्रं विसृज्य देहे॥ हंकाराभावादन्यत्र सौहृदं नास्ति अतस्त्यक्तुमिच्छवः
त्यहः॥ कथं नेतिनेतीत्येवं॥ नात्मा शिशुर्नैव युवा न वृद्धो न पीनरक्तासितमुत्रवर्णः॥ इत्यादि
ना॥ अत्र विद्वदनुभवं प्रमाणयति॥ हृदोपगृह्यध्यानादिना॥ ततः समाहितैरवसितं॥ यद्वा अ
वसितं अवबद्धं॥ आत्मतया गृहीतमित्यर्थः॥ एवं ज्ञाशेषाधिकारिणो दर्शयति॥ एतदिति॥ ॥ तएतद
धिगच्छंति विष्णोर्यत्परमं पदं॥ अहं ममेति दौर्जन्यं न येषां देहगेहजं॥ २४॥ देहजं अहमिति गेहजं॥
ममेति॥ फल्गुपायमाह॥ अतिवादानिति॥ ॥ अतिवादांस्तितिक्षेत नावमन्येत कंचन॥ न चेमं देह द्वा॰टी॰
माश्रित्य वैरं कुर्वीत केनचित्॥ २५॥ शास्त्रसमाप्तौ गुरुं प्रणमति॥ नम इति॥ ॥ नमो भगवते २९

तुभ्यं कृष्णायाकुंठमेधसे॥ यत्पादांभोरुहध्यानात्संहितामध्यगामिमां॥ २५॥ कृष्णाय
व्यासाय॥ अध्यगां अधिगतवानस्मि॥ इमां संहितामध्यगामित्युक्तं॥ तत्र पुराणसंहिता
विभागं विशेषतो वक्तुं तु सर्ववेदविभागमपि प्रसंगात्पृच्छति॥ पैलादिभिरिति॥ ॥ शौनको
वाच॥ पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः॥ वेदाश्च कथिता व्यस्ता एतत्सौम्याभिधे
हि नः॥ १॥ तत्र प्रथमं वेदाविर्भावप्रकारमाह॥ समाहितैरित्यष्टभिः॥ ॥ सूत उवाच॥
समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः॥ हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते॥
२॥ ब्रह्मणो हृदयआकाशात्तस्मान्नादोऽभूत्॥ यः नादः कर्णपुटपिधानेन श्रोत्रवृत्तिनिरो
धात् अस्मदादिष्वपि विभाव्यते अनुभूयते॥ प्रसंगान्नादोपासकानां मोक्षफलमाह॥ यदुपा

सनयेति॥ छ॥ यदुपासनया ब्रह्मन् योगिनो मलमात्मनः॥ द्रव्यक्रियाकारकाख्यं धूत्वायां
त्यपुनर्भवं॥ ३९॥ यस्य नादस्योपासनया आत्मनो मलं धूत्वा अपोह्य। कथं भूतं मलं द्रव्य
क्रियाकारकाख्यं। द्रव्यमधिभूतं क्रिया अध्यात्मं। कारकमधिदैवतं त्रिधाभूतमाश्रियस
इतितथातं। कंठोष्ठादिनिरुच्चार्यमाणस्योंकारस्याक्षरसमाम्नायां तन्त्रीवात्। स्वरूपतयापातं
विशिनष्टि। ततइति॥ छ॥ ततो भूत्रिवृद्वदोंकारो यो व्यक्तप्रभवः स्वराट्। यत्तल्लिंगं भगवतो
ब्रह्मणः परमात्मनः॥ ४०॥ अव्यक्तात् प्रभवो यस्य सः॥ तदेवाह स्वराट्। स्वत एव हृदि प्रका
शमानः॥ तदेव कार्येण लक्ष्यति। यत्तदिति। नपुंसकत्वं लिंगशब्दविशेषणत्वात्। ज्ञापकमि
त्यर्थः॥ कोसौ परमात्मा तमाह। शृणोतीति॥ छ॥ शृणोति य इमं स्फोटं सुप्तश्रोत्रे च शून्यदृक्। येनवा

छां०टी०
३९

क् व्यज्यते यस्य व्यक्तिराकाश आत्मनः॥ ४१॥ इमं स्फोटं शब्दं। ननु जीव एव तं शृणोत्विति ने
त्याह। सुप्तश्रोत्रे कर्णपिधानादिना अवृत्तिके। पिश्रोत्रे सति। जीवस्तु कारणाधीनज्ञानत्वा
त्। न तदा श्रोता। तदुपलब्धिस्तु तस्य परमात्मद्वारकैवेति भावः। ईश्वरस्तु नैवं। यतः शून्य
दृक्। शून्येपींद्रियवर्गे हि कज्ञानं यस्य। तथा हि। असुप्तो यदा शब्दं श्रुत्वा जीवं प्रबोधयति
न तदा जीवश्चेतसी नेंद्रियत्वात्। कोसावोंकारः। तं विशिनष्टि साईना। येन वाग्वृत्ती व्यज्य
ते। यस्य च हृदयाकाशे आत्मनः सकाशात् व्यक्तिः अभिव्यक्तिः। किंच॥ छ॥ स्वधाम्नो ब्रह्म
णः साक्षात् वाचकः परमात्मनः॥ स सर्वमंत्रोपनिषद्वेदबीजं सनातनं॥ ४२॥ स्वधाम्नः स्वस्या
श्रयः कारणं यद्ब्रह्म तस्य किंच। परमांशाभूत समस्तदेवतावाचकोपीत्याशयेनाह। स इति।

सर्वमंत्राणामुपनिषद्रहस्यं सूक्ष्मं सूक्ष्मरूपमित्यर्थः। तत्र हेतुः वेदानां बीजं कारणं। बीजे यथाप
विकारतामाह। सनातनं। सदैकरूपं। तस्य ब्रह्मरूपत्वात्। इदानीं ततः सर्वप्रपंचोत्पत्तिप्रका
रमाह। तस्य ह्येति। ६। तस्य त्वासंख्ययो वर्णा आकाराद्या ऋग्ररुद्रा। धार्यंते येस्त्रयो भावा
गुणा नामार्थिरुत्रयः॥ ४८॥ आकाराद्याः अकार उकार मकाराः। त्रयः त्रिसंख्यायुक्ता भावाः
येरकारोकारमकारैर्धार्यंते। तत्कारणत्वात्। तानेवाह। गुणाः सत्वादयः। नामानि ऋग्य
जुःसामानि। ६। अर्थाः भूर्भुवः स्वर्लोकाः। वृत्तयो जाग्रत्स्वप्नसुषुप्तयः। ततो क्षरसमाम्नाय
मसृजद्भगवानजः। अंतस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणं॥ ४९॥ ततस्तस्यो वर्णेभ्यः ब्रा०टी०
अकारादिभ्यः अक्षराणां समाम्नायं समाहारं। तमेवाह। अंतस्था यरलवाः ऊष्माणः ४०

शषसहाः। स्वराः अकाराद्याः। स्पर्शाः कादयो मावसानाः। ह्रस्वदीर्घश्चादिशब्दात् जिह्वा
मूलीयोपध्मानीयौ तद्वल्लक्षणं स्वरूपं यस्य तं। ६। तेनासौ चतुरो वेदान् चतुर्भिर्वदनै
र्विभुः। सव्याहृतिकान् सोंकारान् चातुर्होत्रविवक्षया॥ ५०॥ विभुः चतुर्मुखो भगवा
न् ब्रह्मा तेनाक्षरसमाम्नायेन चतुरो वेदान् सृजत्। चातुर्होत्रविवक्षया चत्वारो हो
त्रोपलक्षिता ऋत्विजो यास्मात् चतुर्होतारः तैरनुष्ठितं होत्राध्वर्यवादिकं कर्म चातुर्होत्रं तद्विवक्ष
या वक्तुमिच्छया। ६। पुत्रानध्यापयत्तांस्तु महर्षीन् ब्रह्मकोविदान्। ते तु धर्मोपदेष्टारः स्वपुत्रे
भ्यः समादिशन्॥ ५१॥ पुत्रान् मरीच्यादीन् तान् वेदान्। ब्रह्मकोविदान् वेदोच्चारनिपुणान्।
॥ ६॥ ते परंपरया प्राप्ता स्तत्तच्छिष्यैर्धृतव्रतैः। चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः॥ ५२॥ एवं

चतुर्युगेषु आम्नाः द्वापरादौ द्वापरमादिर्यस्य। तदंशांशरूपस्य कालस्य तस्मिन्द्वापरांते
वेदविभागप्रसिद्धेः। शंतनुसमकालव्यासावतारप्रसिद्धेश्च व्यस्ता अभिव्यक्ताः॥ तत्र हेतुः
।छ॥ क्षीणायुषः क्षीणसत्वान्दुर्मेधान्वीक्ष्य कालतः। वेदान्ब्रह्मर्षयो व्यस्यन्हृदिस्था
च्युतनोदिताः॥४७॥ क्षीणायुषोऽजनान्। तत्रापि क्षीणसत्वान्तामसान्। दुर्मेधान्दुष्ट
मेधा धारणशक्तिर्येषां तान्वीक्ष्य। ननु तर्हि शुद्धरूपबुद्धिनवत्वात्तत्र नादरणीयं स्यादि
त्याशंक्याह। हृदिस्थेति। एवं सामान्यतो वेदविभागक्रममुक्त्वा वैवस्वतमन्वंतरे विशेष
तो निरूपयितुमाह। तस्मिन्नपीति। छ॥ अस्मिन्नप्यंतरे ब्रह्मन्भगवान्लोकभावनः॥
ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्मगुप्तये॥४८॥ लोकभावनः लोकानां पालको विष्णुः॥ ब्रह्म द्वा॰टी॰ ४१

दिभिर्लोकपालैर्याचितः सन्॥छ॥ पराशरात्सत्यवत्यामंशांशकलया विभुः॥ अवती
र्णो महाभाग वेदमेकं चतुर्विधं॥४९॥ अंशो मायातस्याः अंशाः सत्वं तस्य कलया अंशेन अव
तीर्णः सन् एकं वेदं चतुर्धा चकार। चातुर्विध्यमेवाह। ऋगिति॥छ॥ ऋगथर्वयजुःसाम्नां
राशीनुद्धृत्य वर्गशः॥ चतस्रः संहिताश्चक्रे मंत्रैर्मणिगणा इव॥५०॥ ऋगादिमंत्राणां राशी
नुवर्गशः तत्तत्करणभेदैः उद्धृत्य वर्गशः। यथाऽनेकविधमणिराशेः मणिगणाः पद्म
रागादयो विविच्य उद्ध्रियंते। तद्वदुद्धृत्य तैर्मंत्रैश्चतस्रः ऋगादिसंहिताश्चक्रे॥छ॥
तासां स चतुरः शिष्यानुपाहूय महामतिः। एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः॥
५१॥ तासां संहितानां मध्ये एकैकां एकस्य समुदायरूपत्वात्। छ॥ पैलाय संहितामाद्यां

बह्वृचाख्यामुवाच ह। वैशंपायनसंज्ञाय निगदाख्यं यजुर्गणं॥५२॥ पैलायऋग्वेदसंहितां
जगाद। वैशंपायनाय यजुर्वेदं॥छ॥ साम्नां जैमिनये प्राह तथाछंदोग्यसंहितां। अथर्वांगि
रसीनाम स्वशिष्याय सुमंतवे॥५३॥ तत्र ऋग्वेदशाखाविभागमाह। पैल इति॥छ॥ पैलः स्वां
संहितामूचे इंद्रप्रमितये मुनिः। बाष्कलाय च सोप्याह शिष्येभ्यः संहितां स्वकां॥५५॥ स्व
संहितां द्विधा विभज्य इंद्रप्रमितये बाष्कलाय च। ऊचे। स बाष्कलोपि स्वसंहितां चतुर्धा व्यस्य बो
ध्यादिभ्यश्चतुर्भ्यः शिष्येभ्य आह॥छ॥ चतुर्धा व्यस्य बोध्याय याज्ञवल्क्याय भार्गवो पराशरा
याग्निमित्र इंद्रप्रमितिरात्मवान्॥५६॥ हे भार्गव इंद्रप्रमितिरपि॥छ॥ अध्यापयत्संहितां
स्वां मांडूकेयमृषिं कविं। तस्य शिष्यो देवमित्रः सौभार्यादिभ्यऊचिवान्॥५७॥ शाकल्य

स्तत्सुतः स्वांतु पंचधा व्यस्य संहितां। वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात्॥५८॥
तत्सुतः मांडूकेयसुतः शाकल्यः। वात्स्यादिषु पंचस्वधात्। तानध्यापयामासेत्यर्थः॥छ॥
जातूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहितां। बलाकपैजवैतालविरजेभ्यो ददौ मुनिः॥
५९॥ तच्छिष्यः शाकल्यशिष्यः। स्वसंहितां त्रेधा विभज्य चतुर्थं विदिकं पदार्थव्याख्यान
रूपं निरुक्तं च कृत्वा बलाकादिभ्यश्चतुर्भ्यो ददौ॥छ॥ बाष्कलिः प्रतिशाखाभ्यो वालि
खिल्याख्यसंहितां चक्रे बालायनिर्भुज्यकासारश्चैव तां दधुः॥६०॥ बाष्कलिः पूर्वोक्तस्य
बाष्कलस्य पुत्रः प्रतिशाखेभ्यः बालायदैव्यादयः तां दधुः। अधीतवंतः। ऋक्शाखोपसं
हारपूर्वकं तद्वृत्तमाह। बह्वृचा इति॥छ॥ बह्वृचाः संहिता ह्येता एभिर्ब्रह्मर्षिभिर्धृताः॥

श्रुत्वैतत् छंदसां व्यासं सर्वपापैः प्रमुच्यते ॥५९॥ एतत् छंदसां० तेषां छंदसां यजुर्वेदे तैत्ति-
रीयशाखोत्पत्तिप्रस्तावमाह। वैशंपायनशिष्येत्यादिना ॥ छ ॥ वैशंपायनशिष्या वै चरका-
ध्वर्यवोऽभवन्। यच्चेरुर्ब्रह्महत्यांहः क्षपणं स्वगुरोर्व्रतं ॥६०॥ चरकनामनिरुक्तिमाह।
यस्माच्चेरुरिति। ब्रह्महत्यारूपं यदंहः क्षपयतीति तथा। स्वगुरोरनुष्ठेयं व्रतं तच्चरणात्
चरका इत्यर्थः ॥ छ ॥ याज्ञवल्क्यस्तु तस्याथ ब्रह्मरातसुतो द्विज ॥ शिष्यः परमधर्मज्ञो गु-
रुवृत्तिरतः सदा ॥६१॥ कदाचिज्जाह्नवीतीरे ऋषीणां तु समागमे। ऋषिर्यैत्र महामेरोस-
माजे नागमिष्यति। तस्य वै सप्तरात्रांते ब्रह्महत्या भविष्यति ॥६२॥ पूर्वमेवं मुनिगणैः समयो
यं कृतो द्विज। वैशंपायन एकस्तु तं व्यतिक्रांतवांस्तदा ॥६३॥ स्वस्रीयं बाधकं सोथ पदास्पृ- भा०टी० ४३

स्वाश्चासनसुपेशलाः ॥७०॥ गेनवासन्यतस्यक शाखा वाजसनीसंज्ञाताः शाखाः काण्व-
माध्यंदिनाद्यो जगृहुः ॥ सामशाखाविभागमाह। जैमिनेरिति ॥ छ ॥ जैमिनेः सामगस्यासी-
त्सुमंतुस्तनयो मुनिः ॥ सुत्वांस्तु तत्सुतस्ताभ्यामेकैकां प्राह संहितां ॥७१॥ तत्सुतः सुमंतु-
सुतः ॥ ताभ्यां पुत्रपौत्राभ्यां क्रमेणैकैकां प्राह ॥ छ ॥ सुकर्मा चापि तच्छिष्यः सामवेदतरोर्म-
हान्। सहस्रसंहिताभेदं चक्रे साम्नां ततो द्विज ॥७२॥ तच्छिष्याः जैमि छर्दितमादानं विप्र-
रूपेण तु चितमिति तित्तिराः पक्षिविशेषान्त्वाऽऽददुः। ततस्ते तैत्तिरीया इति प्रसिद्धाः।
सुपेशलाः अतिरम्याः। बहुवचनमवांतरभेदविवक्षया। काण्वमाध्यंदिनादिशाखा-
प्रसंगमाह। याज्ञवल्क्य इत्यादिना ॥ छ ॥ याज्ञवल्क्यस्ततो ब्रह्मन् छंदांस्यधिगवेषयन्। भा०टी० ४४

ष्पदास्पृष्टमघातयत्। शिष्यानाह च नो शिष्याः ब्रह्महत्यापहं व्रतं। चरध्वमत्र्नते सर्वेन
विचार्यमिदं द्विजाः॥ ६१॥ याज्ञवल्क्यस्तु तच्छिष्यः आहहो भगवान् कियत्। चरितेनाल्प
साराणां चरिष्येहं सुदुश्चरं॥ ६७॥ तच्छिष्यः वैशंपायनशिष्यः। अल्पसाराणामेतेषां चरि
तेन कियत्। सुदुश्चरं व्रतं अहं चरिष्यामीत्युवाच याज्ञवल्क्यः॥ छ॥ इत्युक्तो गुरुरप्याह
कुपितो याह्यलं त्वया। विप्रावमंत्रा शिष्येण मदधीतं त्यजाश्विति॥ ६८॥ विप्राणे अवमंता
अवज्ञाकर्त्तायः स त्वं याहि त्वया शिष्येण अलं। मत्तः अधीतं आशु त्यजेति॥ छ॥ देवरात
सुतः सोपि छर्दित्वा यजुषां गणं। ततो गतोथ मुनयो ददृशुस्तान् यजुर्गणान्॥ ६९॥ देवरा
तसुतो याज्ञवल्क्यः॥ छ॥ यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाददुः। ते तित्तिरीया इति यजुः शा

गुरोरविद्यमानानि सूपतस्थेर्कमीश्वरं॥ ७१॥ गुरोर्वैशंपायनस्य व्यासेन विभज्य दत्तवा
न्। अतः अविद्यमानानि अधिअधिकानि वेषयन् ज्ञातुमिच्छन् सूर्यमुपतस्थे उष्टाव
॥ छ॥ याज्ञवल्क्य उवा॥ ॥ ॐ नमो भगवते आदित्याय अखिलजगतामात्मस्वरूपे
ण कालस्वरूपेण च चतुर्विधभूतनिकायानां ब्रह्मादिस्तंबपर्यंतानां अंतर्हृदयेषु
बहिरपि चाकाश एवोपाधिनाव्यवधीयमानो भगवानेक एव क्षणलवनिमेषाव
यवोपचितसंवत्सरगणेनापादानविसर्गाभ्यामिमां लोकयात्रां वहसि॥ ७२॥ ॐ नमो
भगवते तुभ्यं आदित्याय। यो भवानेक एव इमां लोकयात्रामनुवहसीत्यन्वयः। तदे
व दर्शयति। अखिलस्य जगतामात्मस्वरूपेण अंतर्हृदयेषु कालस्वरूपेण च बहिरपि

वर्त्तमान इति अखिलस्य जगतो मिथ्याप्रपंचः। सूर्य्यएवादयो येवयवाः तेरूपचिता
संवत्सरास्तेषां गणेन प्रत्यक्षमपादानं शोषणं विसर्गो वृष्टिः तान्यां। अनेन गायत्री प्रथम
पादोक्त वरेण्यतानुवर्णिता। द्वितीयपादार्थानुवर्णनेन स्तौति॥ छ॥ यदुहवाच। विबु
धर्षनविसवितरदस्तप्रत्यंनुसवनमहरहराम्नायविधिनोपतिष्ठमानानामखि
लदुरितवृजिनबीजावभर्जनभगवतः समभिध्धीमहि तपनमंडलं॥ ७२॥ हे विबुध
र्षनहे सवितः यदप्यदो भगवतस्तवमंडलं तपति। तत्समभिध्धीमहि। सम्यगाभिमुख्ये
नध्यायेमा। छ्नस्तस्यैव संबोधनं। प्रत्यहंत्रिषवणं वैदिकमार्गेण स्तुवतांभक्तानां सू० टी० ४५
याम्यखिलानि दुरितानि तत्फलानि च वृजिनानि दुःखानि तेषां बीजमज्ञानं च तेषाम

वभर्जनविनाशक। हे तपनेति तृतीयपादेन स्तौति। छ॥ यदुहवाच। स्थिरचरनिकरा
णां निजनिकेतनानां मनइंद्रियासुगणाननात्मनः स्वयमात्मांतर्यामी प्रचोदयति।
३॥ यो भवान् स्थावरजंगमसमूहानां स्वाश्रयाणां जीवानां मनइंद्रियप्राणगणान्
अनात्मजोजडान् स्वयमात्मांतर्यामी सन् प्रचोदयसि प्रवर्त्तयसि। तृतीयपादमे
वमंडलस्थपरितयाप्याचख्यानस्तौति। यएवेति। छ॥ यएवेमं लोकमतिकरालवद
नांधकारसंज्ञाजगरग्रहगिलितं मृतकमिवाविचेतनमवलोक्यानुकंपयापरम
कारिकाईक्षयैवोत्थाप्य अहरहः अनुसवनं श्रेयसि स्वधर्माख्यात्मवस्थाने प्रवर्त्तय
त्यवनिपतिरिवासाधूनां भयमुदीरयन्नटति। परितआशापालैः तत्रतत्रकमलकोशां

॥ छ ॥

जडिनिः उपहृतार्हणः दत्तार्घः॥ अथ हृ भगवंस्तव चरणनलिनयुगलं त्रिभुवनगुरुभिर
निवंदितं। महमयातयामयजुःकाम उपसरामीति॥ छ ॥ ५१॥ यत एवंभूतस्त्वं अथ अतः हस्तु
टं अयातयामानि अन्यैर्यथावद्विज्ञातानि। यजूंषितत्कामोह्यहं उपसरामिनजामि॥ छ ॥ सू
तोवाच॥ ॥एवंस्तुतः स भगवान् वाजिरूपधरो रविः। यजूंष्ययातयामानि मुनयेदात्प्रसा
दितः॥ एवंस्तुतः प्रसादितश्च॥ छ ॥ यजुर्भिरकरोच्छाखादशपंचशतैर्विभुः। जगृहुर्वाजस
न्यस्ताः काण्वमाध्यंदिनादयः॥ ५६॥ पंचदशशाखासखाधातेः अपरिमितैर्यजुर्भिरकरोत्।
सतैरितिपाठे स एवार्थः याज्ञवल्क्यः तैर्यजुर्भिरकरोदिति। जगृहुः अधीतवंतः। रविणा अर्प्य भा०टी० ५८
रूपेण वाजेभ्यः केसरेभ्यः वाजेनवागेनवा सन्यस्तास्तस्य कं शाखा वाजसनीसंज्ञाताः शाखाः।

काण्वमाध्यंदिनाजगृहुः। सामशाखाविभागमाह। जैमिनेरिति॥ छ ॥ जैमिनेः सा
मगस्यासीत्सुमंतुस्तनयो मुनिः। सुत्वांस्तु सुतस्ताभ्यामेकैकां प्राह संहितां॥ ७१॥
तत्सुतः सुमंतुसुतः। ताभ्यां पुत्रपौत्राभ्यां क्रमेणैकैकां प्राह॥ छ ॥ सुकर्मा चापि
तच्छिष्यः सामवेदतरोर्महान्। सहस्रसंहिताभेदं चक्रे साम्नां ततो द्विज॥ ७२॥ तच्छि
ष्यः जैमिनेः शिष्यः। महान् अतिमेधावी सहस्रसंहिताभेदं चक्रे॥ छ ॥ हिरण्य
नाभः कौशल्यः पौष्यंजिश्च सुकर्मणः। शिष्यो जगृहतुश्चान्य आवंत्यो ब्रह्मवित्तम॥
७३॥ साम्नांतंसंहिताचेदं ततस्तदनंतरं सुकर्मणः शिष्यो एकः कौशल्यो हिरण्यनाभः
पौष्यंजि नामा एकः तौ जगृहतुः। आवंत्यश्चान्यः तस्यैव शिष्यः सोपि जग्राह॥ छ ॥ उदीच्या

सामगाः। शिष्याः आसन् पंचशतानि वै। पौष्यंज्यावंत्ययोश्चापि तांश्च प्राच्यान प्रचक्षते।
७३।। पौष्यंज्यावंत्ययोरपि चकाराद्धिरण्यनाभस्यापि पंचशतानि शिष्या आसन्। तेतावंती
शाखा यथायथं ऊरुहन्तु।। नानउदीच्यान सतः कासतः कश्चिन्न प्राच्यान प्रचक्षते। तथा
चोक्तं विस्नवे। उदीच्याः सामगाः शिष्याः तस्य पंचशतं स्मृताः। हैरण्यनाभानावंतः सं
हिता यैर्द्विजोत्तमैः। गृहीतास्तेपि चोच्यंते पंडितैः प्राच्यसामगा इति। उनरष्येतेषां च य
णां सुकर्मणः शिष्याणां शिष्यांतरैः शाखाबाहुल्यं दर्शयति। लोकाक्षिरिति द्वाभ्यां।। छ।। चा०टी०
लोगाक्षिमंगलिः कुल्यः कुसीदः कुक्षिरेव च। पौष्यंजि शिष्या ऊरुहुः संहितास्ते श ५७
तं शतं।।७४।। स तो हिरण्यनाभस्य चतुर्विंशति संहिता।। शिष्य ऊचे स्वशिष्येभ्यः शेषा आवं

वेददृशस्त्वसंहितां चतुर्धा विनअच्चतुरः शिष्यानध्यापयामास। पथ्यश्च त्रिधा विनज्य त्री
निति सार्द्धेन। शौल्कायनिरिति। छ।। शौल्कायनिर्ब्रह्मबलिर्मोदोषः पिप्पलायनिः।। वेददर्शस्य
शिष्यास्ते पथ्यशिष्यानथो शृणु।।२।। कुमुदः शुनको ब्रह्मन् जाजलिश्चाप्यथर्ववित्। बभ्रु
शिष्योथांगिरसः सैंधवायन एव च।।३।। आंगिरसः शुनकस्य शिष्यो बभ्रुः सैंधवायनश्च।
तदुक्तं वैष्णवे। शौनकस्तु द्विधा कृत्वा ददावेकां तु बभ्रवे। द्वितीयां संहितां प्रादात् सैंधवा
यनसंज्ञित इति।। छ।। अधीये तां संहिते द्वे सावर्ण्याद्यास्तथापरे। नक्षत्रकल्पः शांतिश्च क चा०टी०
श्यपांगिरसादयः।।५।। सावर्ण्याद्याः सैंधवायनादीनां शिष्याः नक्षत्रकल्पः शांतिक ५८
ल्पश्च द्वौ। एते आथर्वणवार्याः। अथ पौराणिकान् शृणु।। छ।। त्रय्यारुणिः कश्यपश्च सा

स्यात्मवान्॥७५॥ रुलोनाम हिरण्यनाभस्य शिष्यः स्वशिष्येभ्यः ऊचे। शेषास्त्वन्याश्च पौ
र्व्याः प्रसिद्धाः शाखास्ताश्चावंत्यः स्वशिष्येभ्यः ऊचुरिति॥ ॥छ॥ इति श्रीभागवते महा
पुराणे द्वादशस्कंधे वेदशाखाप्रणयने षष्ठोऽध्यायः॥ ॥सप्तमेऽथर्वविस्तारः पुराणव्य
सनं ततः॥ पुराणलक्षणादीनि फलं भागवतश्रुते॥ क्रमप्राप्तमथर्ववेदविभागमाह॥छ॥
सूतोवाच॥ अथर्ववित्सुमंतुश्च शिष्यमध्यापयत्स्वकं। संहितां सोऽपि पथ्याय वेददर्शाय
चोक्तवान्॥१॥ शिष्यं कबंधनामानं स्वकीयां संहितां सोऽपि शिष्योऽपि तां द्विधा विभज्य पथ्या
य वेददर्शाय चोक्तवान्। तदुक्तं वैष्णवे। अथर्ववेदं समुनिः सुमंतुरमितद्युतिः। शिष्यमध्या
पयामास कबंधं सोऽपि च द्विधा। कृत्वा तु वेददर्शाय तथा पथ्याय दत्तवानिति। तत्र च

वर्णिरकृतव्रणः॥ शंशिपायनहारीतौ षड्वै पौराणिका इमे॥५॥ अधीयंत व्यासशिष्यात्सं
हितां मत्पितुर्मुखात्। एकैकामहमेतेषां शिष्यः सर्वास्समध्यगां॥६॥ मत्पितुर्मुखादिति
प्रथमं व्यासः षट् संहिताः कृत्वा मत्पित्रे रोमहर्षणाय प्रादात्। तस्य च मुखादेते त्रय्या
रुणादयः एकैकां संहितां अधीयंत। एतेषां षण्णां शिष्योऽहं ताः सर्वाः समधीतवान्॥
छ॥ कश्यपोऽहं च सावर्णी रामशिष्योऽकृतव्रणः। अधीमहि व्यासशिष्याच्चत्वारो मूलसं
हिताः॥७॥ रामशिष्योऽकृतव्रणः एवं चत्वारो वयं मूलसंहिता इत्यनेन ततः संहिताबा
हुल्यं सूचितं। शुकपरीक्षित्संवादे निरूपितमपि पुराणलक्षणं तद्भेदकथनाय दर्शय
ति। पुराणेति पुराणलक्षणं ब्रह्मन्नृषिभिश्च निरूपितं। शृणुष्व बुद्धिमाश्रित्य वेदशा

स्यानुसारतः॥९॥ सर्गोस्याथ विसर्गश्च वृत्ती रक्षांतराणि च। वंशो वंशानुचरितं संस्था हेतु
रपाश्रयः॥१०॥ अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः। मन्वंतरेशानुकथा निरोधो मुक्ति
राश्रयः॥ इत्यत्रोक्तेः॥ स्थानपोषणे वृत्तिरक्षाशब्दाभ्यामुच्यते। अंतराणि मन्वंतराणि वंशो
वंशानुचरितमिति ईशानुकथा संस्था निरोधः॥ अनेनैवात्यंतिकप्रलयरूपा मुक्तिरप्यु
क्ता॥ हेतुशब्देन जीवाश्रयवासनाशब्दवाच्याकृतयोगगृहीता॥ छ॥ दशभिर्लक्षणैर्युक्तं
पुराणं तद्विदो विदुः॥ केचित्पंचविधं ब्रह्मन्महदल्पव्यवस्थया॥११॥ दशभिरेतैर्लक्षणैः अथै
र्युक्तं महापुराणं विदुः॥ केचित्पंचविधं तदाहुः॥ सर्गश्च प्रतिसर्गश्च वंशो मन्वंतराणि च। वं — भा०टी० ४९
शानुचरितं चेति पुराणं पंचलक्षणं॥ महदल्पव्यवस्थयो भेदः॥ अत्र दशानि लक्षणानि व्या

चष्टे अव्याकृतगुणक्षोभात् महतस्त्रिवृतोहमः। भूतसूक्ष्मेंद्रिया
र्थानां संभवः सर्ग उच्यते॥१२॥ प्रधानस्य प्रकृतेः गुणानां क्षोभात् यो महान् तस्मात् त्रिवि
धादहंकारः तस्मात् भूतमात्राणां सूक्ष्माणां इंद्रियाणां तदर्थानां च स्थूलानां तद्देवता
नां च स्थूलानां तद्देवता-नां च संभवः सर्गः॥ कारणसृष्टिः सर्ग इत्यर्थः॥ उच्यत इति यथा
पेक्षमुत्तरेष्वप्यनुषंगः॥ विसर्गं व्याचष्टे॥ छ॥ पुरुषानुगृहीतानामेतेषां वासनामयः॥ वि
सर्गोयं समाहारो बीजाद्बीजं चराचरं॥१३॥ पुरुषेणेश्वरेणानुगृहीतानां एतेषां महदा
दीनां पूर्वकर्मवासनाप्रधानोयं समाहारः कार्यभूतश्चराचरप्राणिरूपो बीजाद्बीजमि
व प्रवाहापन्नो विसर्ग उच्यत इत्यर्थः॥ छ॥ वृत्तिर्भूतानि भूतानां चराणामचराणि चा

ता स्वेन नृणां तत्र कामाच्चोदनयापि वा॥१४॥ चराणां भूतानां सामान्यतोऽचराणि च
राचराणि चा तत्र तु नृणां स्वेन स्वभावेन कामात् चोदनयापि वा नियता वृत्तिः जीविका
न्तता सा वृत्तिरुच्यत इत्यर्थः॥ छ॥ रक्षाच्युतावतारेहा विश्वस्यानु युगे युगे। तिर्यङ्मर्त्यर्षि
देवेषु हन्यंते यैस्त्रयीद्विषः॥१५॥ तिर्यङ्मर्त्यर्षिदेवेति येऽच्युतावताराः तेषां ईहा लीला सा
विश्वस्य रक्षोच्यत इत्यर्थः। त्रयीद्विषो दैत्याः षड्विधं मन्वंतरमुच्यते। षड्विधत्वमेवाथ हाम
न्वंतरमिति॥ छ॥ मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वराः। ऋषयोंऽशावताराश्च हरेः षड्विधमु
च्यते॥१६॥ मन्वादयः षडेते वर्गाः स्वस्वाधिकारेण यत्र वर्त्तंते तन्मन्वंतरं। वंशमाह॥ छ॥ राज्ञां भा०टी०
वंशप्रसूतानां वंशस्त्रैकालिकोऽन्वयः। वंश्यानुचरितं तेषां वृत्तं वंशधराश्च ये॥१७॥ ब्रह्मणः स ५०

सकाशात् प्रसूतिर्येषां शुद्धानामित्यर्थः। तेषामन्वयो वंशः। तेषां वृत्तं ये च तद्वंशधरास्ते
षां च वृत्तं वंश्यानुचरितमुच्यते॥ छ॥ नैमित्तिकः प्राकृतिको नित्य आत्यंतिको लयः।
संस्थेति कविभिः प्रोक्ता चतुर्धास्य स्वभावतः॥१९॥ अस्य विश्वस्य स्वभावतो मायातो नि
ष्पन्नस्य। यद्वा। मायातो यश्चतुर्विधो लय इति॥ छ॥ हेतुर्जीवोऽस्य सर्गादेरविद्याकर्मका
रकः। यं चानुशायिनं प्राहुरव्याकृतमुतापरे॥२०॥ अस्य जगतः सर्गादेर्हेतुर्निमित्तं जीवः
सोऽत्र हेतुरुच्यत इत्यर्थः। तस्य जीवस्य निमित्ततामाह। अविद्यया कर्मकारकः। कर्मक
र्त्ता जीवो दृष्टप्रयुक्तत्वात् विश्वसर्गादेः स तु हेतुरित्यर्थः। नन्वनुशायी निमित्तमिति केचि
त्। अव्याकृतमित्यपरे। तत्राह। यमिति। चैतन्यप्राधान्येनानुशायिनं। उपाधिप्राधान्यविव

स्याश्रयास्तं मायाशबलितं ब्रह्म आश्रयमाह। व्यतिरेकेति। छ॥ व्यतिरेकान्वयै
यस्य जाग्रत्स्वप्नसुषुप्तिषु। मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः॥२१॥ जाग्रदादिष
वस्थासु जीवतया वर्त्तत इति जीववृत्तयः विश्वतैजसप्राज्ञाः तेषु मायामयेषु साक्षितया
न्वयः समाध्यादौ च व्यतिरेको यस्य। तद्ब्रह्म संसारप्रतीतिबाधयोरधिष्ठानावधित्वे
तमायाश्रयत्वमुच्यत इत्यन्वयः। तदेव सदृष्टांतं प्रपंचयति। पदार्थेष्विति॥ छ॥ पदार्थेषु
यथा द्रव्यं तन्मात्रं रूपनामसु। बीजादिपंचतांतासु ह्यवस्थासु युतायुतं॥२२॥ पदार्थेषु घ
टादिषु द्रव्यं मृदादि यथा युतं अन्वितं। अयुतं च बहिरप्यवस्थानात्। रूपनामसु च तन्मा भा॰टी॰
त्रं सन्मात्रं यथा एवं बीजं गर्भाधाननामादि यासां पंचतांतानां तासु देहावस्थासु नव ५१

स्वपि अधिष्ठानत्वेन साक्षित्वेन च युतमयुतं च ब्रह्म तदपाश्रय इति। एवं दर्शितं लक्षण
निव्याख्याय वर्णयंति। महात्मन इति युग्मं विरमेतेति। छ॥ विरमेत यदा चित्तं हित्वा वृ
त्तित्रयं स्वयं। योगेन वा तदात्मानं विदेहायप्रवर्त्तते॥२३॥ यदा सर्गादीनां मायामयत्वा
नुसंधानेनैव वामदेवादेरिव स्वयमेव चित्तं विरमेत। इहैव वा अनुष्ठितेन योगेन देवहू
त्यादिवत्। तदा विश्लेषाभावादात्मानं वेद। तदा चाविद्यानिवृत्तेरीहायाः संसाररूपायाः निव
र्त्तत इत्यर्थः॥ पुराणविभागप्रस्तावेन तल्लक्षणादि प्रासंगिकमुक्त्वा प्रस्तुतमाह। एवमिति।
छ॥ एवं लक्षणलक्ष्याणि पुराणानि पुराविदः॥ मुनयोऽष्टादश प्राहुः क्षुल्लकानि महांति च॥
२४॥ एवंविधैर्लक्षणैर्लक्ष्याणि पुराणानि मुनयः प्राहुः॥ छ॥ ब्राह्मं पाद्मं वैष्णवं च शैवं लैंगं

सगारुडं । नारदीयं भागवतं आग्नेयं स्कंदसंज्ञितं ॥२५॥ न विष्यं ब्रह्मवैवर्त्तं मार्कंडेयं सवा
मनं । वाराहं मात्स्यं कौर्म्मं च ब्रह्मांडाख्यमिति त्रिषट् ॥२६॥ त्रिषट् अष्टादश । उपसंहर
ति । ब्रह्मन्निदं समाख्यातं शाखाप्रणयनं मुने । शिष्यशिष्यप्रशिष्याणां ब्रह्मतेजोवि
वर्द्धनं ॥२७॥ मुनेः व्यासस्य शिष्यादीनां । ब्रह्मतेजो ब्रह्मवर्च्चसं तद्विवर्द्धनं । श्रोतॄणां वक्तॄ
णां च ॥ ॥छ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे वेदशाखाप्रणयनं नाम सप्त
मोऽध्यायः ॥ ॥छ॥ अष्टमे तु तपश्चर्या मार्कंडेयस्य मोहकैः ॥ कामादिभिरसंमोहो नर
नारायणस्तुतिः ॥छ॥ पुराणविभागप्रसंगेन पुराणकर्त्तुर्मार्कंडेयस्य चरितं प्रस्तुत भा० टी०
माहात्म्येनेति ॥छ॥ शौनक उवाच ॥ ॥सूत जीव चिरं साधो वद नो वदतां वर । तमस्यपारे भ्र ५२

मतां नृणां त्वं पारदर्शनः ॥ त्वमेव वक्तुं योग्य इत्याह तमसि संशये भ्रमतां पारदर्शनिस्त्वमेव
र्त्तकः । वक्तव्यमाह । आहुरिति ॥छ॥ आहुश्चिरायुषमृषिं मृकंडुतनयं जनाः ॥ यः क
ल्पांते उर्वरितो येन ग्रस्तमिदं जगत् ॥२॥ उर्वरितः अवशिष्टः । येन कल्पांते न एतन्मा
र्कंडेयस्य चिरायुष्ट्वं कथं घटत इत्येकः प्रश्नः । प्रलयाभावादप्येतन्न घटत इत्याह ॥छ॥
स वा अस्मत्कुलोत्पन्नः कल्पेस्मिन् भार्गवर्षभः । नैवाधुनापि भूतानां संप्लवः कोपि जा
यते ॥३॥ यतो भार्गवर्षभः । कोपि प्राकृतो नैमित्तिको वा अन्यदप्यघटितमेवेत्याह । एकेति ।
॥छ॥ एक एवार्णवे भ्राम्यन् ददर्श पुरुषं किल । वटपत्रपुटे तोकं शयानं त्वेकमद्भुतं ॥४॥
तोकं बालकं ॥छ॥ एष नः संशयो भूयान् सूत कौतूहलं यतः । तं नश्छिंधि महायोगिन्

पुराणेष्वपि सम्मतः॥५॥ अत्र हृत्स्थं अत्युक्तं संशयं न केवलं त्वं महायोगी। किंतु पुराणेष्वपि
ज्ञातृत्वेन संमतः प्रश्नमभिनंदति सूतः॥ छ॥ सूत उवाच। प्रश्नस्त्वया महर्षेयं कृतो लोकभ्र
मापहः। नारायणकथा यत्र गीता कलिमलापहा॥६॥ हे महर्षे अयं प्रश्नः लोकभ्रमापहः तत्र
हेतुः। नारायणकथा यत्र। यत्र प्रश्नविषये नारायणकथा। तत्र मार्कंडेयस्तपसा भगवंतमा
राध्य मायां तद्दर्शनं वव्रे। ततस्तस्मै तेनैव भगवन्मायया सप्तकल्पा मुहूर्त्तद्वयेन नष्टा। नान्येरि
त्युत्तरं वक्तुं आदितस्तस्य चरितमाह। प्राप्तेत्यादिना। छ॥ प्राप्तद्विजातिसंस्कारः मार्कंडे
यः पितुः क्रमात्। छंदांस्यधीत्य धर्मेण तपःस्वाध्यायसंयुतः॥७॥ मार्कंडेयो मृकंडुजिग्ये इति पंच
मे नान्वयः। मध्यमग्रंथे न तस्य धर्मः कथ्यते। प्राप्तः द्विजातिसंस्कारः उपनयनाख्यो येन सः। पितु भा०टी० ५२

सकाशात् गर्भाधानादिकमात्। छंदांसि वेदान्॥ छ॥ बृहद्व्रतधरः शांतो जटिलो वल्कलां
बरः। बिभ्रत्कमंडलुं दंडमुपवीतं समेखलं॥८॥ बृहद्व्रतधरः नैष्ठिकब्रह्मचारी सन्। छ॥
कृष्णाजिनं साक्षसूत्रं कुशांश्च नियमर्द्धये। अभ्यर्कगुरुस्त्वर्च्चयन् संध्ययोर्हरिं॥९॥ नि
यमर्द्धये धर्मवृद्धये। अभ्यादिषु पंचसु हरिं अर्च्चयन्। छ॥ सायंप्रातः स गुरवे भैक्ष्यमाहृत्य वाग्य
तः। बुभुजे गुर्वनुज्ञातः सकृन्नो चेदुपोषितः॥१०॥ भैक्ष्यं गुर्वर्थमाहृत्य तेनानुज्ञातश्चेत्तत
र्हि बुभुजे। सकृत् कदाचित् उपोषितो भवति। छ॥ एवं तपःस्वाध्यायपरो वर्षाणामयुतायुतं।
आराधयन् हृषीकेशं जिग्ये मृत्युं सुदुर्जयं॥११॥ ब्रह्मा भृगुर्भवो दक्षो ब्रह्मपुत्राश्च येऽप
रे। नृदेवपितृभूतानि तेनासन्नति विस्मिताः॥१२॥ तेन मृत्युजयेन। छ॥ इत्थं बृहद्व्रतधरः

स्तपःस्वाध्यायसंयमैः॥ दध्यावधोक्षजं योगध्वस्तक्लेशांतरात्मना॥ १४॥ ध्वस्ताः क्लेशा रागाद
यो यस्य तेन। अंतरात्मना अंतःकरणेन मनसा॥ छ॥ तस्यैवं युंजतश्चित्तं महायोगेन योगिनः॥
व्यतीयाय महान्कालो मन्वंतरषडात्मकः॥ १५॥ तपोनिष्ठामतिहासेन वर्णयति। एतदित्यादि
ना॥ छ॥ एतत्पुरंदरो ज्ञात्वा सप्तमेस्मिन्किलांतरे। तपोविशंकितो ब्रह्मन्नारेभे तद्विघातनं॥
१६॥ अस्मिन्सप्तमे मन्वंतरे। तपसा मत्पदं गृहीष्यतीति विशंकितः॥ छ॥ गंधर्वाप्सरसः कामं
वसंतमलयानिलौ। मुनये प्रेषयामास रजस्तोकमदौ तथा॥ १७॥ मुनये तत्र शायितुं रजस्तोकं
अतिप्रियं अपत्यं लोभः मदश्च तौ॥ छ॥ ते वै तदाश्रमं जग्मुर्हिमाद्रेः पार्श्व उत्तरे। पुष्पभद्रा भा॰टी॰
नदी यत्र चित्राख्या च शिला विभो॥ १८॥ तदाश्रमपदं पुण्यं पुण्यद्रुमलतांचितं। पुण्यद्वि ५४

जकुलाकीर्णं पुण्यामलजलाशयं॥ १९॥ तदाश्रमप्रविष्टो वायुर्ववाविति त्रितीयेनान्व
यः। पुण्यैर्द्रुमलताभिश्चांचितं। पुण्यद्विजानां ऋषीणां कुलैराकीर्णं अमलाजलाशयाय
स्मिन्॥ छ॥ मत्तभ्रमरसंगीतं मत्तकोकिलकूजितं। मत्तबर्हिनटाटोपं मत्तद्विजकुला
कुलं॥ २०॥ मत्तभ्रमराणां संगीतं यस्मिन् मत्तकोकिलानां। कूजितं यस्मिन् मत्ताबर्हि
ण एव नटाः तेषामाटोपो यस्मिन् मत्तद्विजानां पक्षिणां कुलैराकुलं व्याप्तं॥ छ॥ वायुः
प्रविष्ट आदाय हिमनिर्झरसीकरान्। सुमनोभिः परिष्वक्तो ववावुत्तं नयन्स्मरं॥ २१॥ ए
वं तत्तदाश्रमपदं प्रविष्टः सन्वायुर्मलयानिलो ववौ प्रससार स्मरं उत्तं नयन् उद्दीप
यन्। तत्र हृज्जे प्रवेशान्मांशं हिमनिर्झरकणैः शीतलं। पुष्पपरिष्वंगात्सौगंध्यं चोक्तं।

छ॥ उद्यच्चंद्र निशावक्त्रः प्रवालस्तबकालिनि॥ गोपद्रुमलताजाले रेजे रासीनकुसुमाक
रः॥२१॥ उद्यन्चंद्रो यस्मिन्। तं निशावक्त्रं रजनीमुखं यस्मिन्। प्रथमस्तबकाले स्तबकानं
आश्रयः श्रेण्यो येषु ताः॥ गुच्छंति विटपैः श्लिष्यंतीति गोपाद्रुमाः लताश्च तेषां जाले।
समूहैः आविर्बभूव॥ छ॥ अन्वीयमानो गंधर्वैः गीतवादित्रयूथकैः॥ अवहत्तान्नवापेषु
स्वस्त्रीयूथपतिः स्मरः॥२२॥ तदा गीतवादित्रयूथकैः गायकादिसमुदायैः अगंधर्वैश्च
न्वीयमानः। तदा स्वः स्त्रियोऽप्सरसः तासां स्वः स्त्रीणां यूथस्य पतिः आत्तं गृहीतं चापंदु
श्रयेन। स्मरश्च तत्राऽदृश्यत॥ छ॥ फुल्लाग्निं समुपासीनं ददृशुः शक्रकिंकराः॥ मीलि
तादृशं दुराधर्षं निर्मितमग्निमिवानलं॥२३॥ दुराधर्षं अग्निमिव तमशक्यं॥ छ॥ ननृतुस्तस्य

पुरतः स्त्रियोऽथो गायका जगुः॥ मृदंगवीणापणवैर्वाद्यं चक्रुर्मनोरमं॥२४॥ संदधेऽस्त्रं
स्वधनुषि कामः पंचमुखं तदा॥ मधुर्म्मदो रजस्तोनरं द्रुतं त्वाथकं पयन्॥२५॥ शोषन
मोहन संदीपन तापसोन्मादनाख्यानि पंचमुख्यानि यस्य। तदस्त्रं संदधे। तदैव मधुर्वसं
तः रजस्तो नभश्च पुंस्त्वमार्षं चान्ये चेंद्रनृत्याः तस्य मनो व्यकंपयन्॥ छ॥ क्रीडंत्यास्तु
जिकस्थल्याः कंदुकैः स्तनगौरवात्। नृशमुद्विग्नमध्यायाः केशविस्रंसितस्रजः॥२६॥
रतस्तनोत्तमदृष्टेः चलंस्ताच्चानुकंदुकं। वायुर्जहार तद्वासः स्रस्तं त्रुटितमेखलं॥२७॥
वायुर्मलयानिलः पुंजिकस्थल्यास्तस्याः स्रस्तं वासो जहार॥ छ॥ विससर्ज तदा बाणं म
त्वा तं स्वजितं स्मरः॥ सर्वं तत्राभवन्मोघमनाग्यस्य यथोद्यमः॥२८॥ सर्वं तेषां कर्म्म तत्र

स्मिन्नमोघं व्यर्थं। अनीशस्य अनाग्यस्य॥ छ॥ तद्दृत्तमपकुर्वंतो मुनेस्तत्तेजसा मुने। दग्ध
मानाविवहृत्तः प्रबोध्याहिमिवार्चका॥ २९॥ मुनेरपकुर्वंतः प्रतिकूलमाचरंतः हे मुने
॥ छ॥ इतींद्रानुचरैर्ब्रह्मन् धर्षितोपि महामुनिः। यन्नागादहमो नावं न तच्चित्रं महत्सु हि
३०॥ अहमः अहंकारस्य नावं विकारं॥ छ॥ दृष्ट्वा निस्तेजसं कामं सगणं भगवान् स्वराट्
श्रुत्वानुभावं ब्रह्मर्षेर्विस्मयं समगात्परं॥ ३१॥ निस्तेजसं म्लानवदनं। स्वराट् इंद्रः॥ छ॥ तस्यै
वं युंजतश्चित्तं तपःस्वाध्यायसंयमैः। अनुग्रहायाविरासीन्नरनारायणो हरिः॥ ३२॥ नरना
रायणरूपो हरिः तावनुवर्णयति द्वाभ्यां॥ छ॥ तौ शुक्लकृष्णौ नवकंजलोचनौ चतुर्भुजौ
रौरववल्कलांबरौ। पवित्रपाणी उपवीतकं त्रिवृत्कमंडलुं दंडमृजुं च वैणवं॥ ३३॥ रौर

द्वा॰ टी॰
५१

वं रुरस्याजिनवल्कलं अंबरं ययोस्तौ। पवित्रे पाण्योर्ययोः तौ। त्रिवृत त्रिगुणं नवतं
तुकमेव उपवीतं दधानौ॥ छ॥ पद्माक्षमालामुत जंतुमार्जनं वेदं च साक्षात्तप ए
वरूपिणौ। तपस्तडिद्वर्णपिशंगरोचिषा प्रकाशमानौ विबुधर्षभार्चितौ॥ ३४॥ तपस्त
डिद्वर्णं दीप्यमानं विद्युत्संकाशं यत्पिशंगरोचिस्तेन पिशंगरोचिषा प्रकाशमानौ। रूपि
णौ मूर्तिमंतौ तादृक् तेजोयुक्तमूर्तिभ्यां तपोमयत्वेन प्रकाशमानावित्यर्थः। जंगस्त
न्नतौ॥ छ॥ ते वै भगवतो रूपे नरनारायणावृषी। दृष्ट्वोत्थायादरेणोच्चैर्नमामांगेन दंड
वत्॥ ३५॥ उच्चैर्महता आदरेण॥ छ॥ सत्संदर्शनानंदनिर्वृतात्मेंद्रियाशयः। हृष्टरोम
श्रुपूर्णाक्षो न सेहे तावुदीक्षितुं॥ ३६॥ तयोः संदर्शनेन य आनंदः तेन निर्वृता उपशांता आ

त्मेंद्रियाशया देहेंद्रियमनांसि यस्य सः॥ उदीरितुं द्रष्टुं न सहे नाशक्नोत्॥ ३६॥ उत्थाप्यांउरसि
औत्सुक्यादाश्लिषन्निव। नमो नम इतीशानं बभाषे गद्गदाक्षरः॥ ३७॥ आश्लिषन् आलिंग
यन्निव॥ ७॥ तयोरासनमादाय पादयोरवनिज्य च। अर्हणेनानुलेपेन धूपमाल्यैरपूजयत्॥
३८॥ पादयोरवनिज्य पादौ प्रक्षाल्य अर्हणेन अर्घेण पादावानम्य॥ ७॥ सुखमासन आसी
नौ प्रसादाभिमुखो मुनिः॥ मुनिरानम्य पादाभ्यां गिरिशं वाक्यमब्रवीत्॥ ३९॥ गिरिशो प्रजनतमे।
तौ प्रति अंतर्यामिणः स्वस्यैव प्राणादिप्रवर्त्तकत्वात् आत्मनस्तत्सुतावत्त्वात् तं अपश्यन्नाह।
किमिति॥ ७॥ मार्कंडेय उवाच॥ किं वर्णये तव विभो यदुदीरितासुः संस्पंदते तेन मनुवाग्
न इंद्रियाणि स्पंदंति चैतनुभृतामजशर्वयोश्च स्वस्याप्यथापि भजतामसि भावबंधुः॥ ४०॥ दु० टी० ५७

हे विभो तव त्वां किमहं वर्णये कथं स्तौमि। यतस्त्वत्तः येन त्वयैव उदीरितः प्रेरितोऽसुः प्राणः
संस्पंदते प्रवर्त्तते। तं असुं अनु च वागादयः स्पंदंति। अत्र हेतुः। अन्वयव्यतिरेकाभ्यां।
श्रोत्रस्य श्रोत्रमित्यादिश्रुतिसिद्धत्वं त्वमसि इत्यर्थः॥ न केवलं प्राकृतानां तनुभृतां किं
तु अजशर्वयोश्च। अतः स्वस्य ममापि तथैव। एवं यद्यपि न कश्चिदपि कस्यापि त्वां तं अपि च
यापि दारुयंत्रवत् प्रवर्त्तितैरपि वागादिभिः भजतां पुंसां भावबंधुः आत्मबंधुरसि। न
तु पित्रादिवत् देहमात्रबंधुः अहो स्वरूपानुतानत्वेत्यर्थः॥ ननु कथमात्मा प्राणादिप्रवर्त्तकोऽथ
र्म्मिष्ठत्वात् भावयोः इति चेत्तत्राह। मूर्ती इति॥ ७॥ मूर्ती इमे भगवतो भगवंस्त्रिलोक्याः क्षेमा
य तापविरमाय च मृत्युजित्यै। नाना बिभर्ष्यवितुमन्यतनूर्यथेदं सृष्ट्वा पुनर्ग्रससि सर्व

मिवोऽर्णानि॥ हे भगवन् भगवतस्तव रमेभ्र त्रिविलोकपाः स्वे मायपालनाय तापविरमा
य दुःखनिवृत्त्यै मत्सुजित्यै मोक्षाय न तु त्वं कस्यापि सुत्वरस्त्वर्थः॥ अत्र दृष्टांतः यथेदं विश्व
मविद्धं अन्यास्तन्नर्मस्यकर्मादि लक्षणानाना अनेक प्रकाराबिनर्षित त्वा न केवलं
पालनादिमात्रं कर्म्म किं तु सृष्ट्यादिलयावधीत्याह। सृष्टेति। तथाद्यन्यनिरपेक्षत्वे दृष्टांतः॥ ऊ
र्णनाभिरिवेति। यस्मादेवं भूतस्त्वं। तस्मात्त्वं ओंकारमूलं त्वं भजामीत्याह। तस्येति। ॐ॥ तस्याविद्धा
त्निस्वरोऽशिद्धहं कारमूलं यत्स्थं न कर्मगुणकालरूपाः स्पृशंति। यद्देवस्तु वंति निनमंतियऊंत्स
नीयां ध्यायंति वेदहृदया मुनयस्तदाश्ये॥ ५२॥ तस्य च विद्धः पालकस्य ब्रह्मावरजं गमान
मीश्वरस्य। भजामीति तृतीयश्लोकस्यानुषंगः॥ कथं भूतमं कारमूले लयस्थं यत्र स्थितं ज भा॰ टी॰ ५८

नं कर्मगुणकालानां रूपाः न स्पृशंति। अन्ये च पूर्वोक्तालापादयो न स्पृशंति। यतः वेदोम
दयये षां ते वेदतात्पर्यविदो मुनयः यद्देवस्तु वंति। निनमंति निनरां नमंति ततः तत्त्वाश्रयेय
वनादि कुर्वंति॥ ५३॥ यतः अन्यः पुरुषार्थो नास्तीत्याह। नान्यमिति॥ ॐ॥ नान्यं तवांघ्रु
पनयादपवर्गमूर्त्तेः क्षेमं जनस्य परितो भिय ईश विद्मः॥ ब्रह्माविनेत्यस्य मनोद्विपरा
र्द्धधिष्ण्यः कालस्य ते किमुत तत्कृत भौतिकानां॥ ५४॥ अंघ्र्युपनयनात् श्रीमच्चरण
प्राशेरन्यत्क्षेमं न विद्मः परितः सर्वेष्वपि लोकेषु भीर्यस्य तस्य जनस्य। तदेवाह द्विप
रार्द्धधिष्ण्यं स्थानं यस्य सः॥ ब्रह्मापि ते कालस्य त्वविजं भरूपात् कालात् अत्यंतं बिभेति।
अतः किमुत वक्तव्यं। तेन ब्रह्मणा सृतानां भौतिकानां प्राणिनां भयमिति भावः॥ ॐ॥ त

देहजात्मत्वाद्धियस्तत्र पादमूलं हित्वेदमात्मच्छविमात्मगुरोः परस्य देहाद्यपार्थमसदंत्यमभि
ज्ञमात्रं विंदेत ततो तर्हि सर्वमनीषितार्थं ॥४४॥ यस्मादेवं तस्मात्ते पादमूलं न जह्मि कथंभूतस्य तत
धियः सर्वज्ञस्य ज्ञानस्वरूपस्य । यद्वा सत्याधीर्यस्य तस्मिन्वा । तस्य चात्मगुरोरीश्वरस्य नियंतुः यतः
कारणात् । किं कृत्वा इदं देहादि भजनं त्यक्त्वा । कथंभूतमिदं । आत्मच्छदि आवरकं अपार्थ
निष्फलं । असत् तुच्छं अंत्यं च नश्वरं । ननु असच्चेत् कथं प्रतीयेत । अभिज्ञमात्रं । न ह्यस्यांतम
सत् किं त्वात्ममात्रं । न ततः पृथगस्तीत्यर्थः । ननु अपवर्गाय भवद्भजनं । फलांतरार्थं त्वन्य
भजनं कार्यमेव तत्राह । तर्हीति । यदि त्वां भजति पुरुषः तर्हि तत एव सर्वमनीषितमर्थं वि
देतेति । ननु अजरुद्रावपि ममैव मूर्ती अतो मामेव किमत्यंतमाश्रियसे । तत्राह । सत्त्वमिति ॥ भा॰टी॰ ५६

॥छ॥ सत्त्वं रजस्तम इतीश तवात्मबंधो मायामयाः स्थितिलयोदयहेतवोऽस्य । लीला धृता यदपि
सत्त्वमयी प्रशांत्यै नान्ये नृणां व्यसनमोहभियश्च याभ्यां ॥४५॥ एवमपि यद्यपि तवैव मायागु
णा एव लीला त्वयैव धृता । तथापि या सत्त्वमयी मूर्तिः सैव प्रशांत्यै मोक्षाय न केवलं यया अ
स्य प्रशांत्यन्नावमात्मभजने किंतु निष्टं च किंचिदन्यया त्वेन वेदित्याह । व्यसनेति । तदेव भ
जनं सदाचारेण द्रढयति । तस्मादिति ॥छ॥ तस्मात्तवेह भगवन्नथ तावकानां शुक्लां त
नुं स्वदयितां कुशला भजंति । यत्सात्वताः पुरुषरूपमुशंति सत्त्वं लोको यतोऽभयमुतात्म
सुखं न चान्यत् ॥४६॥ हे भगवन् तव शुक्लां तां तनुं श्रीनारायणाख्यां अथवा तावकानां
शुक्लां तनुं नराख्यां यत यस्मात् सात्वताः सत्त्वमेव पुरुषरूपमीश्वरस्वरूपमुशंति मन्यं

तेन त्वन्यतः रजस्तमश्चेत्यत्र हेतुः। यतः सत्वात् लोकः वैकुंठाख्यः सोकः त्वे सत्यप्यजयं च। योगेस
त्यप्यात्मसुखं च। अनन्तं ब्रह्म इति। तस्मै नम इति॥छ॥ तस्मै नमो भगवते पुरुषाय भूम्ने विश्वा
य विश्वगुरवे परदेवतायै। नारायणाय ऋषये च नरोत्तमाय हंसाय संयतगिरे निगमेश्वराय॥४७॥
हंसाय शुद्धाय। संयतगिरे नियमितवाचे। अथ च निगमेश्वराय। वेदमार्गप्रवर्त्तकाय। वेदार्थसंप्र
दायप्रवर्त्तने हेतुं वदन् श्लोकेन। यमिति॥छ॥ यं वै न वेद वितथाक्षपथैर्भ्रमद्धीः सन्तं स्वखेष्वसुषु
हृद्यपि दृक्पथेषु तन्माययावृतमतिः स उ एव साक्षादाद्यस्तवाखिलगुरोरुपसाद्य वेदं॥४८॥ भा०टी०
कपटेंद्रियमार्गैः भ्रमद्धीः विक्षिप्तबुद्धिः पुमान्। स्वेंद्रियादिषु नियंतृत्वेन स्थितमपि न वेद। १०
दृक्पथेषु विषयेषु विक्षिप्ता। बुद्धिविक्षेपे हेतुः। तस्मात् यया तस्य तवैव मायया आवृता आत्म

णीशतानि च। व्यतीयुर्भ्रमतस्तस्मिन् विष्णुमायावृतात्मनः॥१९॥ विष्णुमायावृतात्म
नः इति स तया दृष्टवानिति॥छ॥ स कदाचिद्भ्रमंस्तस्मिन् पृथिव्याः ककुदि द्विजः॥ न्यग्रो
धपोतं ददृशे फलपल्लवशोभितं॥२०॥ ककुदि उन्नतप्रदेशे। न्यग्रोधपोतं कमप
वटं॥छ॥ प्रागुत्तरस्यां शाखायां तस्यापि ददृशे शिशुं। शयानं पर्णपुटके ग्रसंतं प्र
भया तमः॥२१॥ तस्य ईशानदिक्शाखायां शिशुं शयानं ददृशे। स्वप्रभया तमो ग्रसं
तं॥छ॥ महामरकतश्यामं श्रीमद्वदनपंकजं। कंबुग्रीवं महोरस्कं सुनासं सुंदरभ्रुवं।स्या
श्रीमद्रम्यं वदनपंकजं यस्य। कंबुवत् त्रिरेखा रेखा ग्रीवा यस्य तं। महोरस्कं विशालव
क्षसं। शोभना नासा यस्य तं। सुंदरे भ्रुवौ यस्य॥२२॥ श्वासैजदलकाभातं कंबुश्रीकर्णदाडि

मं। विद्रुमाधरभासेषत्शोणायितसुधास्मितं॥२३॥ स्वासैरेजंतः कंपमानाञ्चलकालैराना
तशोभितं। कंबुवद्दंतवल्लयेनश्रीर्ययोः। तौ कंबुश्रियौ तयोः कर्णयोः हाटिमद्धृष्येयस्या
तं विद्रुमवल्याधरभासाईषच्छोणायितं सुधावत्स्वच्छं स्मितं यस्य तं॥ ○॥ पद्मग...णापांगं
हृद्यहासावलोकनं। तद्वदवलोकनं यस्य तं। स्वासैरेजं त्यस्यलं त्यावलयस्तिर्यक निम्ना
रवातानि: संविग्नाचंचलानिम्नागंभीरानिर्यस्मिन् तत्। चलवदंस्ववदुपत्रसंकाशमुदरं
यस्य तं॥ ○॥ चार्वंगुलिभ्यां पाणिभ्यां उन्नीय चरणांबुजं। मुखे निधाय द्विरीद्रं धयंतं वीस्य
विस्मितः॥२५॥ चारवः अंगुलयो ययोः ताभ्यां उन्नीय आस्ये घ धयंतं पिबंतं॥ ○॥ तद्दर्शी
नाद्दीतपरिश्रमो मुदा प्रोत्फुल्लहृत्स्वपद्मविलोचनांबुजः। प्रहृष्टरोमाद्भुतभावशंकितः द्रष्टुं पुर

दु०टी०
५४

स्तं प्रससार बालकं॥२६॥ हृत्स्वपद्मं विलोचनांबुजे च प्रोत्फुल्लानि यस्य सः। अद्भुतभावे
न आश्चर्यरूपं तेन शंकितः सन्नपि तं द्रष्टुं पुरः प्रससार। समीपं गतः॥ ○॥ तावच्छिशोर्विश्ववि
तेन नागवद्मोनः शरीरं मशको यथाविशत्। तत्राप्यदोन्यस्थमचष्ट कृत्स्नशो यथा पुरामु
ग्धदतीव विस्मितः॥२७॥ अदः इदं जगत् यथा पुरा प्रलयास्तर्व्यस्तं विन्यस्तं दृष्ट्वा अ
तीव विस्मितः सन् अमुह्यत। कृत्स्नशो दर्शनं प्रपंचयति। खं स्वमिंसादिना॥२८॥ खं रोद
सी जगणान् शैलसागरान् द्वीपान् सवर्षान् ककुभो सुरासुरान्। वनानि देशान् सरितः
पुराकरान् खेटान् व्रजानाश्रमवर्णवृत्तयः॥२९॥ ककुभो दिशः। पुराणि आकरास्खे
टान् कर्षुकग्रामान्। व्रजान् गोकुलानि आश्रमान् वर्णांश्च तेषां वृत्तीश्च स्पर्थः॥ ○॥ म

हांतिरूतान्यथ नौतिकान्यसौ कालं च नानायुगकल्पकल्पनं। यत्किंचिदन्यद्व्यवहारका
रकैणं ददर्श विश्वं सदिवावभासितं॥२८॥ नानायुगानि कल्पांश्च कल्पयति तैर्वा कल्प्यतइति
तथा तं कालं च सदिव परमार्थ इवेत्यवभासितं॥छ॥ हिमालयं पुष्पवहां च तां नदीं निजाश्र
मं तत्र ऋषीन पश्यत। विश्वं विपश्यञ्छ्वसिताच्छिशोर्वै बहिर्निरस्तो न्यपतल्लयाब्धौ॥२९॥ ततः
स्मिन् पृथिव्याः ककुदि प्ररूढं वटं च तत्पर्णपुटे शयानं। तोकं च तत्प्रेमसुधास्मितेन निरी भा॰टी॰
क्षितो पांगनिरीक्षणेन॥३०॥ तत्रैव वटं च तोकं च वीक्ष्य नेत्रे न प्रेम्णा सुधातुल्येस्मितेन युक्तेनापां ६५
गनिरीक्षणेन निरीक्षितः सन्॥छ॥ अथ तं बालकं वीक्ष्य नेत्राभ्यां धिष्ठितं हृदि। अभ्ययादति
संक्लिष्टः परिष्वक्तुमधोक्षजं॥३१॥ अथ तं बालकमधोक्षजं ज्ञात्वा परिष्वक्तुं समायादित्यर्थः

योरन्वयः। कथंभूतं नेत्राभ्यां हृदि धिष्ठितं॥छ॥ तावत्स भगवान् साक्षाद्योगाधीशो गु
हाशयः। अंतर्दध ऋषेः सद्यो यथेहानीशनिर्मिता॥३२॥ तावत्परिष्वंगलालनात्पूर्वमेव
ऋषेस्तस्यांतर्हितो बभूव। तदुद्यमवैफल्ये दृष्टांतः। अनीशो निरीहः। तेन निर्मिता ईहा
क्रीडा यथेति॥छ॥ तमन्वथ वटो ब्रह्मन् सलिलं लोकसंप्लुतः। तिरोधायि क्षणादस्य
स्वाश्रमे पूर्ववत्स्थितः॥३३॥ अंतर्हितं भगवंतं अनुवटः सलिलं लोकसंप्लवश्च तिरोधा
यि अंतर्हितः। स च स्वाश्रमे एव तस्मिन्नेव दिने यथापूर्वं स्थित इति मत्वा विस्मितो बभूवेति
शेषः॥ ॥छ॥ ॥इति श्री भा॰ म॰ द्वादशस्कंधे मार्कंडेयोपाख्याने भगवन्मायादर्शनं ना
म नवमोऽध्यायः॥ ॥छ॥ दशमे शिवश्चागत्य मुनेस्तुष्टो वरान् ददौ। तेन सा कमनिश्रीत्या

समानाप्यसनाऽऽयत। सूतोवाच॥ स एवमनुभूयेदं नारायणविनिर्मितं। वैभवं योगमायाया
स्तमेव शरणं ययौ॥१॥ ऋषिरु०॥ ॥प्रपन्नोस्म्यंघ्रिमूलं ते प्रपन्नाभयदं हरे। यन्मायया पिवि
बुधा मुह्यंति ज्ञानकाशया। ज्ञानकाशया ज्ञानवत्प्रकाशया। त्वद्भजनं विना विद्वांसोऽपि यस्य
तवमायया ज्ञानिनो वयमित्यहंकारेण मुह्यंतीत्यर्थः। यद्वा ज्ञानगर्हयेति पाठे। ज्ञानं चात्मज्ञा
नं गर्हयति आच्छादयतीया सा ज्ञानगर्हा तया। श्रीनारायण एव स्वमायादर्शनश्रांतं तं स्वाशि
वरूपेण सांत्वयामास तदाह॥२॥ सूत उवाच॥ ॥तमेवं निभृतात्मानं वृषेण दिवि पर्यटन्॥
रुद्राण्या भगवान्रुद्रो ददर्श स्वगणैर्वृतः॥३॥ निभृतात्मानं समाहितचित्तं। रुद्राण्या भवाण्या॥ द्वा०टी० ११
अथोमा तमृषिं वीक्ष्य गिरिशं समभाषत। पश्येमं भगवन्विप्रं निभृतात्मेंद्रियाशयं॥४॥ निभृत

निश्चलं आत्मेंद्रियाशया देहेंद्रियमनांसि यस्य तं॥४॥ निभृतोदझषव्रातो वातापाये यथार्णवः॥
कुर्वस्य तपसः साक्षात्संसिद्धिं सिद्धिदो भवान्॥५॥ निभृतं निश्चलमुदकं झषव्राताश्च यस्मिन्
सः॥ संसिद्धिं फलं साक्षात्कुरु प्रकटीकुरु। यतो भवान् सिद्धिदः॥५॥ श्रीरुद्र उवाच॥ ॥नैवेच्छ
त्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत। भक्तिं परां भगवति लब्धवान् पुरुषेऽव्यये॥६॥ आशिषः श्र
त्युदयलक्षणाः। तत्र हेतुः भक्तिमिति॥६॥ यथापि संवदिष्यामो भवान्येतेन साधुना। अयं हि प
रमो लाभो नृणां साधुसमागमः॥७॥ संवदिष्यामः संवादं करिष्यामः॥७॥ इत्युक्त्वा तमुपेया
य भगवान् स सतां गतिः। ईशानः सर्वविद्यानामीश्वरः सर्वदेहिनां। सतां गतित्वे हेतुः। ईशान इति
॥८॥ तयोरागमनं साक्षादीशयोर्जगदात्मनोः। न वेद रुद्धधीवृत्तिरात्मानं विश्वमेव च॥९॥

ह्यधियोंतःकरणस्य हृन्नयो येन सः ॥ छ ॥ भगवांस्तदभिज्ञाय गिरीशो योगमायया । अविशद्ब
ह्यहाकाशं वायुश्छिद्रमिवेश्वरः ॥ १० ॥ आत्मन्यपि शिवं प्राप्तं तडित्पिंगजटाधरं । अद्भुतं दशभु
जं प्रांशुमुद्यंतमिव भास्करं ॥ ११ ॥ न केवलं बहिरेव आत्मन्यपि प्राप्तं शिवं विचक्ष्य विस्मितः । क
थं प्राप्तं सहसा अकस्मादेव हृदि प्राप्तं । कथंभूतं तडिद्वत्पिशंगा जटा धारयतीति तथा तं । त्रीण्य
क्षीणि यस्य तं ॥ छ ॥ व्याघ्रचर्मांबरं शूलधनुरिष्वसिचर्मभिः । अक्षमालाडमरुककपालप
रशुं सह ॥ १२ ॥ शूलादिभिः सह अक्षमालादीन् बिभ्राणमित्यन्वयः । अक्षमालादीनां द्वंद्वैक्यं ।
छ ॥ बिभ्राणं सहसा भातं विचक्ष्य हृदि विस्मितः । किमिदं कुत एवेति समाधेर्विरतो मुनिः ॥ १३ ॥ शां॰टी॰ ६७
विस्मयपूर्वकं बहिर्दर्शनमाह । किमिदमिति ॥ छ ॥ नेत्रे उन्मील्य ददृशे सगणं सोमया युतं । रु

रुद्रं त्रिलोकैकगुरुं ननाम शिरसा मुनिः ॥ १४ ॥ सोमया उमया सह सगणं रुद्रं ददृशे । ततोऽव
ननाम ॥ छ ॥ तस्मै सपर्यां व्यदधात्सगणाय सहोमया । स्वागतासनपाद्यार्घ्यगंधस्रग्धूप
दीपकैः ॥ १५ ॥ आह त्वात्मानुभावेन पूर्णकामस्य ते विभो । करवाम किमीशान येनेदं नि
र्वृतं जगत् ॥ १६ ॥ पूर्णकामत्वं व्यनक्ति । येन त्वया जगन्निर्वृतं भवतीति । निर्गुणत्वेन त्रिगु
णत्वेन च नमस्करोति ॥ छ ॥ नमः शिवाय शांताय सत्त्वाय प्रमृडाय च । रजोजुषेऽथ घोराय
नमस्तुभ्यं तमोजुषे ॥ १७ ॥ नमः शिवाय निर्गुणाय सत्त्वाय सत्त्वाधिष्ठात्रे । अन एव प्रमृडय
ति सुखयतीति तथा तस्मै ॥ छ ॥ सूत उवाच । एवं स्तुतः स भगवानाह देवः सतां गतिः । परितु
ष्टः प्रसन्नात्मा प्रहसंस्तमभाषत । श्रीरुद्र उवाच ॥ ॥ वरं वृणीष्व नः कामं वरदेशा वयं त्रयः ॥

अमोघं दर्शनं येषां मर्त्यो यद्धिं द नेमृतं॥१९॥ नः अस्मान् त्रयः ब्रह्मविष्णुमहेशाः यत्नेयः
ते वयं वरदा नादिना नवक्षे वेवास्माभिः क्रियते न त्वनुग्रहः। उगर्द्धं यत्त्वात्। नवतामिति ब्राह्म
णा न ह्लोति। ब्राह्मणा इत्यादि॥ ॥ ब्राह्मणाः साधवः शांता निःसंगा भूतवत्सलाः। एकांतभक्ता
अस्मासु निर्वैराः समदर्शिनः॥२०॥ ये साधवः सदाचाराः शांताः मत्सरादिरहिताः निःसंगा निःका
माः॥ ॥ सलोका लोकपालास्तान् वंदंत्यर्चंत्युपासते। अहं च भगवान् ब्रह्मा स्वयं च हरिरी
श्वरः॥२१॥ न केवलं त एव किं तु अहं चेत्यादि। याज्ञतमत्वे हेत्वंतरमाह नतेति। ॥ न ते मय्य
च्युते ऽजे च भिदामण्वपि चक्षते। नात्मनश्च जनस्यापि तद्युष्मान् वयमीमहि॥२२॥ अण्वपि भा॰टी॰
अणुमात्रमपि चक्षते न पश्यंति। तत्तस्मात् एवं भूतान् युष्मान् ईमहि भजेम॥ ॥ न ह्यंमया ९८

नि तीर्थानि न देवाश्चेतनोज्झिताः। ते पुनंत्युरुकालेन यूयं दर्शनमात्रतः॥२३॥ ब्राह्मणेभ्यो न
मस्यामो ये स्मद्रूपं त्रयीमयं। बिभ्रत्यात्मसमाधानतपःस्वाध्यायसंयमैः॥२४॥ ब्राह्मणेभ्यः
ब्राह्मणेन आत्मसमाधानं चित्तैकाग्र्यं। तपः आलोचनं। स्वाध्यायः अध्ययनं। संयमः वागा
दिनियमः। तैः किंच॥ ॥ श्रवणाद्दर्शनाद्वापि महापातकिनोऽपि वः। शुध्येरन्नंत्यजाश्चापि
किमु संभाषणादिभिः॥२५॥ इति चंद्रललामस्य धर्मगुह्योपबृंहितं। वचोऽमृतायनमृषिर्न
तृप्यत्कर्णयोः पिबन्॥२६॥ चंद्रललामो भूषणं यस्य। तस्य धर्मरहस्ययुक्तममृतास्पदं व
चः कर्णाभ्यां पिबन् नातृप्यत्। अलमिति नामन्यत। कर्णयोरमृतायनमिति चान्वयः॥ ॥
स चिरं मायया विष्णोर्भ्रामितः कर्शितो भृशं। शिववागमृतध्वस्तक्लेशपुंजस्तमब्रवीत्।

२७॥शिवस्यवागेवअमृतंतेनध्वस्तःक्लेशोदुःखंजोयस्यसः॥ऋषिरु०॥ ॥अहोईश्वरस्यचर्येयं
दुर्विभाव्याशरीरिणां।यन्नमन्तीशितव्यानिस्तुवन्तिजगदीश्वराः॥२८॥इयंलीलादुर्विभाव्या॥
अविनेक्या।यत्तस्याईशितव्यानिस्वनियम्यानिनतानिजगदीश्वराःस्वयंनमन्तिस्तुवन्तिचे
ति।अथवालोकसंग्रहमात्रमेतदित्याह।धर्म्ममिति॥छ॥धर्म्मग्राहयितुंप्रायःप्रवक्तारश्च
देहिनां।आचरन्त्यनुमोदन्तेक्रियमाणंस्तुवन्तिच॥२९॥प्रवक्तारोऽपिस्वयंदेहिनांधर्ममाचरन्ति।
नन्वेतस्यनावतिरस्कारंकथंमयाक्रियतेतत्राह।छ॥नैतावताभगवतःस्वमायामयवृत्तिभिः।
नदुष्येतानुभावस्तैर्मायिनःकुहकंयथा॥३०॥एतावतालोकसंग्रहमात्रेणतैर्नमनादिभिः भा०टी० ९९
भगवतोमायिनस्तत्वानुभावोनदुष्येत।कथंभूतैर्नमनादिभिःस्वमायामयीवृत्तिर्येषुतैः।य

तःप्रसिद्धस्यमायिनःकुहकंकपटंयथातथैतानिनमनादीनिअतस्तस्यकुहकेनअनुभा
वोनदुष्येतेति।तद्वत्।प्रदुष्यतेतिपाठेनकारस्यदृष्टांतत्वेनानुषंगः॥मायाचेष्टितंप्रपंचयति॥
सृष्ट्वेति॥छ॥सृष्ट्वेदंमनसाविश्वमात्मनानुप्रविश्ययः।गुणैःकुर्वद्भिराभातिकर्त्तेवतत्स्वप्र
दृग्यथा॥३१॥स्वप्नदृग्यथेत्यविद्याचेष्टितेदृष्टांतः॥छ॥तस्मैनमोभगवतेत्रिगुणायगुणात्म
ने।केवलायाद्वितीयायगुरवेब्रह्ममूर्त्तये।त्रिगुणत्वेऽपिनजीववद्बद्धनिरूतायाःकिंतुगुणा
नामात्मनेनियंत्रे।वरंवृणीष्वेतियदुक्तंतत्राह।कमिति।छ॥कंवृणीयपरंब्रह्मन्वरंवरद
र्शनात्।यद्दर्शनात्पूर्णकामःसत्यकामःपुमान्भवेत्॥३३॥वरंदर्शनंयस्यतस्मात्त्वत्तःपरं
कंवरंवृणे।यस्यतवदर्शनात्पूर्णकामःसर्वानंदसंदोहरूपःसत्यकामःयथेष्टंप्राप्तसर्वानं

दः॥ छ॥ वरमेकं वृणे ह्यापि पूर्णात्कामाभिवर्षणात्। भगवत्यच्युतां भक्तिं तत्परे च तथा त्वयि॥
२५॥ तत्परे विष्णुभक्ते च तथा त्वयि त्रिशूलधृक्॥ छ॥ सूत उवाच॥ ॥इत्यर्चितोऽभिष्टुतश्च मुनिना सूक्त
या गिरा। तमाह भगवान् शर्वः शर्वया चाभिनंदितः॥२६॥ वरदानाय त्वयमेव प्रवृत्तः शर्वया उ
मयाभ्यभिनंदितः प्रेरितः सन्नाह॥ छ॥ कामो महर्षे सर्वोऽस्तु भक्तिमांस्त्वमधोक्षजे। आ
कल्पान्ताद्यशः पुण्यं च अजरामरता तथा॥२७॥ ते सर्वेऽपि कामाः अस्तु अन्यच्च पुण्यं यश इत्यादि
ब्रह्मवर्चस्विनस्ते भूयादित्युत्तरेणान्वयः॥ यत्त्वमधोक्षजे भक्तिमान्। छ॥ ज्ञानं त्रैकालि
कं ब्रह्मन् विज्ञानं च विरक्तिमत्। ब्रह्मवर्चस्विनो भूयात्पुराणाचार्यतास्तु ते॥२८॥ ब्र द्वा०टी०
ह्मवर्चस्विनस्ते ज्ञानं विज्ञानं विरक्तिमत् वैराग्यसंयुक्तं भूयात्॥ छ॥ सूत उवाच॥ ॥एवं ७०

वरान्स मुनये दत्वागात्र्यक्ष ईश्वरः। देव्यै तत्कर्म कथयन् अनुभूतं पुरा मुनेः॥२९॥
तत्कर्म तस्य कर्म तपआदि मुनेः पुरानुभूतं यन्मायाविभवं तच्च कथयन्॥ छ॥ सोऽप्य
वाप्तमहायोगमहिमा भार्गवोत्तमः। विचरत्यधुनाप्यद्धा हरावेकान्ततां गतः॥३०॥ अ
वाप्तो योगमहिमा येन सः॥ छ॥ अनुवर्णितमेतत्ते मार्कंडेयस्य धीमतः। अनुभूतं भ
गवतो मायावैभवमद्भुतं॥३१॥ एतन्मार्कंडेयस्य चरितं। तेनानुभूतं भगवन्मायावै
भवं तेऽनुवर्णितं। नन्वेवमस्मत्कुलोत्पन्नस्य सप्तकल्पायुष्ट्वं दृष्टं रुच्यमानं विरुद्ध
मेवेत्यत आह॥ छ॥ एतत्केचिदविद्वांसो मायासंसृतिमात्मनः। अनाद्यावर्तितं नृणां
कादाचित्कं प्रचक्षते॥३२॥ एतन्मार्कंडेयेनानुभूतं भगवन्मायावैभवं नानाकल्परूपं

कदाचित ईश्वरेछयाप्यस्यैव चाकस्मिकं नतु सर्वसाधारणं। एतत्केचिन्नचनादिव
ऽकालं आवर्त्तितदेवयुगसहस्रद्वयमानेनपुनःपुनः परिवर्त्तितं प्रचक्षते। मृक
संसृतिसर्गप्रलयादिलक्षणं आत्मनो भगवतो मायेत्येवमविद्वांसः। विद्वांसस्तु माय
यावेशादयं मोहः सा च यां सप्तसृत्वा तदुदरप्रवेशनिर्गमनतः सप्तकल्पस्वं स्मरणम
त्रेणनिवदंति। अतो न विरोध इत्यर्थः॥ छ॥ य एवमेतद्भृगुवर्य वर्णितं रथांगपाणेरनु
भावभावितं। स श्रावयेत्संशृणुयादु तावुभौ तयोर्न कर्माशयसंसृतिर्भवेत्॥४२॥ क
र्म्मवासनाकृतासंसृतिर्न्न भवेदिति॥ ॥श्री॥ ॥इति श्रीभागवते महापुराणे द्वादशस्कं द्वा०टी० ७१
धे मार्कंडेयोपाख्याने दशमोऽध्यायः॥ ॥छ॥ एकादशे तु पूजार्थं महापुरुषवर्णनं। त

देवरहस्य चाख्यानं श्रुतिमासं पृथक् पृथक्। येनामर्त्यत्वमाप्नोति मर्त्योसौ भागवोत्तम॥
तंत्रे छति क्रियायोगं सांगोपांगादि कल्पितं॥२॥ शौनक उवाच॥ ॥अथेमम् अर्थं पृच्छामो
भवंतं बहुवित्तमं। समस्ततंत्रराद्धांते त्वं भागवततत्त्ववित्॥१॥ हे भागवत। यतो भगव
न्समस्तराद्धांतं जानीते तत्त्ववित्। प्रष्टव्यमाह। तांत्रिकेति। छ॥ तांत्रिकाः परिचर्यायां के
वलस्य श्रियः पतेः। अंगोपांगायुधाकल्पं कल्पयंति यथैव ये॥२॥ परिचर्यायां उपास
नायां विषये केवलस्य चैतन्यघनस्य अंगानि पादादीनि उपांगानि गरुडादीनि आयुधा
नि सुदर्शनादीनि। आकल्पाः कौस्तुभादयः तेषां द्वंद्वैक्यं तद्यथा कल्पयंति। येश्च तत्त्वैः क
ल्पयंति तन्नो वर्णयेति। गुरूपदेशागम्यत्वात् अस्यार्थस्य अतः गुरोर्नमस्कारपूर्वकमाह।

॥छ॥ सूत उवाच॥ ॥ नमस्कृत्य गुरून्वक्ष्ये विभूतीः वैष्णवीरपि। याः प्रोक्ता वेदतन्त्राभ्यां आ
चार्यैः पद्मजादिभिः॥३॥ विभूतीः विराड्विग्रहाद्याः। अंगादिकल्पनां भूरादिभिः दर्शयि
तुं प्रथमं तावत् यथा कल्पयंतीति प्रश्नस्य वैराजरूपेण स्थूलरूपं वक्तुं विराड्विग्रहमाह।
मायेति॥छ॥ मायाद्यैर्नवभिस्तत्त्वैः स विकारमयो विराट्। निर्मितो दृश्यते यत्र सचित्के भु
वनत्रयं॥५॥ मायाद्यैर्नवभिः प्रकृतिः सूत्रं महदहंकारः पंचतन्मात्राणि नवभिस्तत्त्वैः॥ विका
रा एकादशेंद्रियाणि। पंचमहाभूतानीति षोडश तन्मयो विराट्। स प्रसिद्धो निर्मितः। यत्र वि
राजि सचित्के चेतनाधिष्ठिते भुवनत्रयं दृश्यते। अनेनांगादिकल्पनासौलभ्यं दर्शितं॥छ॥ भा॰टी॰ ७२
एतद्वै पौरुषं रूपं भूः पादौ द्यौः शिरो नभः। नाभिः सूर्योऽक्षिणी नासे वायुः कर्णौ दिशः प्रभोः॥

॥६॥ एतद्वै पौरुषं रूपं। रूपस्य वैराजस्य रूपमिवेश्वरेणाधिष्ठितत्वात्तदेवेदं विवक्षया तत्स्वरू
पमुच्यते। अंगकल्पनामाह। भूः पादाविति त्रिभिः। भूराद्यनुवादेन भगवत्पादादि विधीयते।
॥छ॥ प्रजापतिः प्रजननमपानो मृत्युरीशितुः। तद्बाहवो लोकपाला मनश्चंद्रो भ्रुवौ यमः॥
॥७॥ प्रजननं मेढ्रं। अपानः पायुः। अनुक्रमन्यदप्येवमूह्यं इत्याह॥छ॥ लज्जोत्तरोऽधरो लोभो
दंता ज्योत्स्ना स्मयो भ्रमः। रोमाणि भूरुहा भूम्नो मेघाः पुरुषमूर्धजाः॥८॥ यावानयं वै पुरु
षो यावत्या संस्थया मितः। तावानसावपि महापुरुषो लोकसंस्थया॥९॥ यावान्सं व्यष्टिपुरु
षः स्वमानतः सप्तवितस्तिः संस्थावयवसंनिवेशेन मितः। भूषणादीन्याह॥छ॥ कौस्तुभव्यप
देशेन स्वात्मज्योतिर्बिभर्त्यजः। तत्प्रभा व्यापिनी साक्षात् श्रीवत्समुरसा विभुः॥१०॥ आत्म

ज्योतिः स्वरूपं जीवचेतना। यातस्य कौस्तुभस्य प्रभा॥ तमेव श्रीवत्सं बिभर्त्ति॥ छ॥ स्वमायां वनमालाख्यां नानागुणमयीं दधत्। वासः छंदोमयं पीतं ब्रह्मसूत्रं त्रिवृत्स्वरं॥ ११॥ त्रिवृत्स्वरं त्रिमात्रप्रणवं॥ छ॥ बिभर्त्ति सांख्यं योगं च देवो मकरकुंडले। मौलिं पदं पारमेष्ठ्यं सर्वलोकाभयंकरं॥ १२॥ पारमेष्ठ्यं वैकुंठं॥ छ॥ अव्याकृतमनंताख्यमासनं यदधिष्ठितं। धर्मज्ञानादिभिर्युक्तं सत्त्वं पद्ममिहोच्यते॥ १३॥ अव्याकृतं प्रधानं यदधिष्ठितः। अधिष्ठाय स्थितः॥ तदासनमनंतं पद्मं सत्त्वं सत्त्वगुणः॥ छ॥ ओजः सहोबलयुतं मुख्यतत्त्वं गदां दधत्। अपां तत्त्वं दरवरं तेजस्तत्त्वं सुदर्शनं॥ १४॥ ओजः सहोबलयुतं मुख्यं तत्त्वं प्राणतत्त्वं गदां दधत्। प्राणो वै मुख्य इति श्रुतेः॥ दरवरं पांचजन्यं॥ छ॥ नभोनिभं

नभस्तत्त्वं असिं चर्म तमोमयं। कालरूपं धनुः शार्ङ्गं तथा कर्ममयेषुधीः॥ १५॥ इंद्रियाणि शरानाहुराकूतीरस्य स्यंदनं। तन्मात्राण्यस्याभिव्यक्तिं मुद्रयार्थक्रियात्मतां॥ १६॥ आकूतीः क्रियाशक्तियुतं मनः अस्य रथस्याभिव्यक्तिः॥ बहिरभिव्यक्तं रूपं मुद्रया धृतया अर्थक्रियात्मतां वरदाभयदादिरूपत्वं बिभर्त्ति। तन्मुद्रया तया तया भावयेदित्यर्थः॥ छ॥ मंडलं देवयजनं दीक्षा संस्कार आत्मनः। परिचर्या भगवत आत्मनो दुरितक्षयः॥ १७॥ मंडलं देवयजनं देवपूजा भूमिः सूर्यमंडलत्वेन भावयेदित्यर्थः॥ परिचर्येति भगवतः तां परिचर्यां स्वस्य पापक्षयरूपां भावयेदित्यर्थः॥ पूर्वं पद्मासनमुक्तं इदानीमंतःस्थं पद्ममाह॥ छ॥ भगवान् भगशब्दार्थं लीलाकमलमुद्वहन्। धर्मं यश

श्च भगवान् चामरव्यजने दधत्॥१८॥ भगवच्छब्दार्थमैश्वर्यादिषाड्गुण्यं। धर्मश्चामर
रूपेण यश एवं व्यजनरूपेण भावयेत्। आतपत्रं तु वैकुण्ठं द्विजधामाकुतोभयं। त्रिवृद्वे
दः सुपर्णाख्यो यज्ञं वहति पूरुषं॥१९॥ हे द्विज। अकुतोभयं केवल्यं धाम गृहं समनजत।
यद्वा वैकुण्ठस्य विशेषणं। अकुतोभयं यद्धामेति। त्रिवृत् ऋग्यजुःसामरूपो वेदः सुपर्णो
सि गरुत्मान्। त्रिवृदित्यादिमंत्रलिंगात्। यज्ञं यज्ञरूपं पुरुषं। यज्ञो वै विष्णुरिति श्रुतेः।
॥छ॥ अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः। विष्वक्सेनस्तंत्रमूर्तिर्विदितः पार्षदा
धिपः॥२०॥ अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः शक्तिः॥ तत्र हेतुः॥ साक्षादात्म
नः स्वस्वरूपस्य चिद्रूपत्वात्तस्याः। तदभेदादित्यर्थः। तंत्रमूर्तिः पंचरात्राद्यागमरूपः॥ छ॥

॥छ॥ नंदादयोऽष्टौ द्वाःस्थाश्च तेऽणिमाद्या हरेर्गुणाः॥ वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः
स्वयं। अनिरुद्ध इति ब्रह्मन् मूर्तिव्यूहोऽभिधीयते॥२१॥ येऽणिमादयोऽष्टौ गुणाः ते ह
रेर्द्वारपाला नंदादयः। तस्यैव चतुर्व्यूहोपासनमाह। स विश्वेति। छ॥ स विश्वस्तैज
सः प्राज्ञः तुरीय इति वृत्तिभिः। अर्थेंद्रियाशयज्ञानैर्भगवान् परिभाव्यते॥२२॥ स
एव भगवान् विश्वतैजसप्राज्ञतुरीयशब्दैः वृत्तिभिर्जाग्रदाद्यवस्थाभिः परिभाव्यते॥२२
स एव भगवान् विश्वत्वाद्युपाधीनाह। अर्थाः बाह्याः इंद्रियं मनः आशयस्तदुभयसं
स्कारयुतं त्रितयसाक्षीति। उक्तं चतुर्व्यूहोपासनेऽपि सर्वोक्तिमंगाद्युपासनमाह॥
अंगेति। छ॥ अंगोपांगायुधाकल्पैः भगवान् तच्चतुष्टयं। बिभर्ति स्म चतुर्मूर्तिर्भगव

नहरिरीश्वरः ॥ ६३ ॥ अंगादिनिरूपलक्षितो भगवान् हरिर्वासुदेवादिचतुष्टयं बिभ्रद
पि भगवानीश्वर एवेति । तस्य ब्रह्मादित्रिमूर्त्तितामाह ॥ ६४ ॥ द्विजेति । ६५ ॥ द्विजऋषभस
एकब्रह्मयोनिः स्वयंदृक् स्वमहिमपरिपूर्णो मायया च स्वयैतत् सृजति हरति पाती
त्याख्यया नावृतो ज्ञो विवृत इति निरुक्तस्तस्मैरात्मन्नभ्यः ॥ ६६ ॥ स एक एव भगवान् ब्र
ह्मयोनिः वेदस्य कारणमित्यादि हेतुत्रयं । वस्तुतोऽभेदाभावेपि स्वगतमायया सृजति ।
हरति पातीति स्वलाभ आख्यया ब्रह्मादिरूपया अनावृतोऽस्त्यनाच्छन्नज्ञानोऽपि विवृत इ
व भिन्न इव निरुक्तः शास्त्रेषु । ननु भिन्नः । अत्र विद्वदनुभवं प्रमाणयति । यतस्त्वसंगे
आत्मत्वेन लभ्यत इति यस्येदमुपासनमुक्तं तं श्रीकृष्णं प्रार्थयन्नाख्यानसमाप्तौ आशि

द्वा०टी०
७५

षमाशास्ते ॥ ६७ ॥ श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवी
र्य । गोविंद गोपवनिताव्रजभृत्यगीततीर्थश्रवश्श्रवणमंगल पाहि भृत्यान् ॥ ६८ ॥ हे
कृष्णसख अर्जुनस्य सखे हे वृष्णिश्रेष्ठ अवनिद्रुहो ये राजन्याः तेषां वंशस्य दहन । अन
पवर्गम् अक्षीणं वीर्यं यस्य । गोपवनितानां व्रजाः समूहाः । भृत्या नारदादयः तैर्गीतं तीर्थ
भूतं यशः कीर्त्तिर्यस्य । श्रवणमेव मंगलं यस्य । एतज्जपमात्रस्यापि ब्रह्मज्ञानं फल
मित्याह । य इदमिति । ६९ ॥ य इदं कल्य उत्थाय महापुरुषलक्षणं । तच्चित्तः प्रयतो ज
प्त्वा ब्रह्म वेद गुहाशयं ॥ ७० ॥ कल्ये उषाकाले यतचित्तः प्रयतः शुचिर्भूत्वा सन् जप्त्वा गु
हाशयं हृदिस्थं ब्रह्म पश्यति । मूर्त्तिव्यूहप्रसंगेन इति व्यूहं पृच्छति ॥ ७१ ॥ शौनक उवाच ॥

र्कोयदाहभगवान्विष्णुर्नारायणएवते। सौरोगणोमासिमासिनानावसतिसप्तकः॥२७॥
पंचमेयदाह। तथा अन्ये ऋषयः। गंधर्वाप्सरसोनागाग्रामण्योयातुधानादेवाइत्येकैक
शोगणः सप्तेत्यादिना सौरः सूर्यसंबंधी॥७॥ तेषांनामानिकर्माणिसंयुक्तानामधीश्वरैः।
ब्रूहिनःश्रद्दधानानांव्यूहंसूर्यात्मनोहरेः॥२८॥ तेषांसप्तानांअधीश्वरैः तत्रसंक्लिनि
तत्रस्मासाधिष्ठतस्सूर्यैर्वाव्यूहंविनागंतत्रतावत्व्यूहंनिरूपयितुंप्रथमंसूर्यस्वरूप
माह। अनाद्येति। अनाद्यविद्ययाविष्णोः आत्मनः सर्वदेहिनां। निर्गतोलोकतंत्रोयंलोके
षुपरिवर्त्तते॥२९॥ अनादिरविद्यामायया अयंसूर्यः लोकतंत्रः लोकयात्राप्रव
र्त्तकः अतस्तस्यक्रियाभेदोपाधिकमेवनानात्वंनस्वतइत्याह। एकेति॥७॥ एकएव

भा० टी०
७५

हिलोकानांसूर्यआत्मादिकृद्धरिः। सर्ववेदक्रियामूलंऋषिभिर्बहुधोदितः॥३०॥ सूर्यआ
त्माजगतस्तस्थुषश्चेति। अतस्तस्यक्रियाभेदोपाधिकः आदित्यस्तुहिकर्त्ताहरिरे
वसूर्यः। सचसर्वासांवेदोक्तक्रियाणांमूलं। सनतेनोपाधिनाबहुधोक्तः। कालरूपध
रिणोहरेः द्वादशादित्यरूपंभेदंक्रियोपाधिकंदर्शयितुंप्रथमंसर्वकर्मप्रवर्त्तयेमायात्
तंनवधाभेदमाह॥७॥ कालोदेशः क्रियाकर्त्ताकारणंकार्य्यमागमः। द्रव्यंफलमिति
ब्रह्मन्नवधोक्तोऽजयाहरिः॥३१॥ कालःप्रातरादिः। देशःसमकर्करवर्जितः। क्रिया
इतिकर्त्तव्यता। कर्त्ताब्राह्मणादिः करणंस्रुगादि। कार्ययागादि। आगमंमंत्रादि। द्रव्यंव्री
ह्यादि। फलंस्वर्गादि। नवधाहरिरेवोक्तः॥७॥ मध्वादिषुद्वादशसुभगवान्कालरूप

पृथक्। लोकतंत्राय चरति पृथक्द्वादशभिर्गणैः॥३२॥ तत्र च कालरूपधारी भगवान्
मधुआदिषु लोकतंत्राय लोकयात्रानिर्वाहाय पृथक् पृथक् चरति। तानेव गणानाह।
धातेति द्वादशभिः॥ धाता कृतस्थली हेतिः वासुकी रथकृन्मुने॥ पुलस्त्यस्तुंबुरुरिति म
धुमासं नयंत्यमी॥३३॥ धाता सूर्यः। कृतस्थली अप्सरा। हेतिः राक्षसः। वासुकिर्नागः।
रथकृत् यक्षः॥ पुलस्त्य ऋषिः। तुंबुरुर्गंधर्वः। मधुमासं चैत्रमासं नयंति॥ अर्य्य
मा पुलहोथौजा प्रहेतिः पुंजिकस्थली। नारदः कच्छनीरश्च नयंत्येते स्म माधवं॥३४॥
अर्य्यमा सूर्यः। पुलहो ऋषिः। अथौजा यक्षः। प्रहेती राक्षसः। पुंजिकस्थली अप्सरा।
नारदो गंधर्वः। कच्छनीरो नागः। माधवं वैशाखं॥ मित्रोऽत्रिः पौरुषेयोथ तक्षको मेनका भा०टी० ७७

हहा। रथस्वन इति चैते स्म शुक्रमासं नयंत्यमी॥३५॥ मित्रः सूर्यः। अत्रिः ऋषिः। पौरुषेयो
राक्षसः। तक्षको नागः। मेनका अप्सरा। हाहा गंधर्वः। रथस्वनो यक्षः। शुक्रमासं ज्येष्ठं नयं
ति॥ वसिष्ठो वरुणो रंभा सहजन्यस्तथा हुहूः। शुक्रश्चित्रस्वनश्चैव शुचिमासं नयं
त्यमी॥३६॥ वसिष्ठो ऋषिः। वरुणः सूर्यः। रंभा अप्सरा। सहजन्यो यक्षः। हूहूर्गंधर्वः। शुक्रो
नागः। चित्रस्वनो राक्षसः। शुचिमासं आषाढं नयंति॥ इंद्रो विश्वावसुः श्रोता एलापत्र
स्तथांगिरः। प्रम्लोचा राक्षसः वर्यो नभोमासं नयंत्यमी॥३७॥ इंद्रः सूर्यः। विश्वावसुर्गं
धर्वः। श्रोता यक्षः। एलापत्रो नागः। अंगिरा ऋषिः। प्रम्लोचा अप्सरा। वर्यो राक्षसः। नभोमा
सं श्रावणं॥ विवस्वानुग्रसेनश्च व्याघ्र आसारणो भृगुः। अनुम्लोचा शंखपालो न

स्याख्यं नयंत्यमी॥ ३८॥ विवस्वान् सूर्यः उग्रसेनो गंधर्वः व्याघ्रो राक्षसः॥ आसारणोय
स्तः भृगुऋषिः॥ अनुम्लोचाप्सरा॥ शंखपालो नागः॥ नभस्याख्यं भाद्रपदं॥ ३९॥ पूषा
धनंजयो वातः सुषेणः सुरुचिस्तथा। घृताची गौतमश्चेति इषमासं नयंत्यमी॥ ४०॥
पूषा सूर्यः धनंजयो नागः वातो राक्षसः॥ सुषेणो गंधर्वः सुरुचिर्यक्षः॥ घृताची अप्सरा॥
गौतमो ऋषिः इषमासं आश्विनं॥ ४१॥ क्रतुर्वर्चा भरद्वाजः पर्जन्यः सेनजित्तथा। विश्वो
ऐरावतश्चैव ऊर्जमासं नयंत्यमी॥ ४२॥ क्रतुर्यक्षः॥ वर्चा राक्षसः॥ भरद्वाजो ऋषिः॥ प वा० टी० ७८
र्जन्यः सूर्यः॥ सेनजित् अप्सरा॥ विश्वो गंधर्वः॥ ऐरावतो नागः॥ ऊर्जं कार्तिकं॥ ४३॥ अथां
शुः कश्यपस्तार्क्ष्यः ऋतसेनस्तथोर्वशी॥ विद्युच्छत्रुर्महाशंखः सहोमासं नयंत्यमी॥ ४४॥

सहस्याख्यं नयंत्यमी २

अंशुः सूर्यः॥ कश्यपो ऋषिः॥ तार्क्ष्यो यक्षः॥ ऋतसेनो गंधर्वः॥ उर्वशी अप्सरा॥ विद्युच्छ
त्रो राक्षसः॥ महाशंखो नागः॥ सहोमासं मार्गशीर्षं॥ ४५॥ भगः स्फूर्जोऽरिष्टनेमिः ऊ
र्णा आयुश्च पंचमः॥ कर्कोटकः पूर्वचित्तिः अप्सरा॥ सहस्याख्यं पौषं॥ ४६॥ त्वष्टा ऋ
चीकतनयः कंबलाश्च तिलोत्तमा॥ ब्रह्मापेतोथ शतजित् धृतराष्ट्र इषंभरा॥ ४७॥ त्व
ष्टा आदित्यः ऋचीकतनयो जमदग्निऋषिः कंबलाश्वो नागः॥ तिलोत्तमा अप्सरा॥ ब्रह्मापे
तो यक्षः॥ शतजित् राक्षसः॥ धृतराष्ट्रो गंधर्वः॥ इषंभरा माघमासं नयंति॥ ४८॥ विष्णुरश्वतरो
रंभा सूर्यवर्चाश्च सत्यजित्। विश्वामित्रः मखापेत फाल्गुनाख्यं नयंत्यमी॥ ४९॥ विष्णुः सू
र्यः॥ अश्वतरो नागः रंभा अप्सरा॥ सूर्यवर्चा गंधर्वः शतजित् यक्षः॥ विश्वामित्रो ऋषिः॥ म

खापेतो राक्षसः। फाल्गुनं नयंति ॥ छ ॥ एता भगवतो विष्णोः आदित्यस्य विभूतयः। स्मरतां सं
ध्ययोर्नृणां हरंत्यंहो दिने दिने ॥ ५५ ॥ एते चादित्यादयः कौर्म्ये विनियोजकाः। धातार्यमा च मित्र
श्च वरुणश्चेंद्र एव च। विवस्वानथ पूषा च पर्जन्यश्चांशुरेव च। भगस्त्वष्टा च विष्णुश्च आ
दित्या द्वादश स्मृताः ॥ १ ॥ पुलस्त्यः पुलहश्चात्रिः वसिष्ठोथांगिरा भृगुः। गौतमोथ भरद्वाजः
कश्यपः क्रतुरेव च। जमदग्निः कौशिकश्च मुनयो ब्रह्मवादिनः ॥ २ ॥ रथः कृन्मोक्षिष्टनेमिः
ग्रामणीनां रथस्वनः। अथ चित्रस्वनः श्रोता च वरुणः श्येनजित्तथा। तार्क्ष्यश्चारिष्टनेमिश्च वा०टी०
ऋतजित्सत्यजित्तथा। एते यक्षाः। अथ हेतिः प्रहेतिश्च पौरुषेयो वधस्तथा। वयो व्याघ्रस्त ७९
था पश्च वायुर्विद्युद्दिवाकरः। ब्रह्मापेतश्च विप्रेंद्र यज्ञापेतश्च राक्षसाः ॥ ४ ॥ वासुकिः कच्छनी

रश्च तक्षकः सर्पपुंगवः। एलापत्रः शंखपालः तथैरावतसंज्ञितः ॥ ५ ॥ धनंजयो महापद्मः
तथा कर्कोटको द्विज। कंबलोश्वतरश्चैव वहंत्येवं यथाक्रमं ॥ ६ ॥ तुंबरु नारदो हाहाहू
हू विश्वावसुस्तथा। उग्रसेनो वसुरुचिः विश्वावसुतथापरः। चित्रसेनस्तथोर्णायुः धृतरा
ष्ट्रो द्विजोत्तमाः ॥ ७ ॥ अनुम्लोचा घृताची च विश्वाची चोर्वशी तथा। अन्या च पूर्वचित्तिश्च अ
न्याश्चैव तिलोत्तमा। रंभा चेति द्विजश्रेष्ठा तथैवाप्सरसः स्मृताः। एतेषां पृथकर्माणि निबो
धयत चिनिः ॥ छ ॥ द्वादशस्वपि मासेषु देवोसौ षड्भिरस्य वै। चरन्समंतात्तनुते परत्रेह
च सम्मतिः ॥ ८ ॥ असौ सूर्यः षड्भिर्गंधर्वा[illegible]भिः समंतात्चरन् अस्य उनस्य पुञ्जांमणिं
तनुते। गायत्यथैनं नस्तृच्चितः ॥ छ ॥ सामर्ग्यजुर्भिस्तल्लिंगैः ऋषयः संस्तुवंत्यमुं। गंधर्वा

नोदयंति रथं पृष्ठे नैरृता बलशालिनः॥४८॥ उत्तरांति रथं बध्नंति। ग्रामण्यो यक्षाः रथयोजकाः॥ कैलर

त्वंप्रगायंति नृत्यंत्यप्सरसोग्रतः॥४७॥ तद्विंगेः सूर्य्यप्रकाशकैः॥छ॥ उत्तरांति रथं नागा
ग्रामण्योरथयोजकाः॥ नैरृता राक्षसाः पृष्ठे रथं प्रेरयंति॥छ॥ वालिखिल्यास्सहस्राणि
षष्टिर्ब्रह्मर्षयोमलाः॥ पुरतोभिमुखा यांति स्तुवंति स्तुतिभिर्विभुं॥४९॥ वालिखिल्याः षष्टि
सहस्राणि एते प्रतिमासं तएव। विभुं सूर्य्यं॥छ॥ एवं ह्यनादिनिधनो भगवान् हरिरीश्वरः।
कल्पेकल्पे स्वमात्मानं व्यूह्य लोकानवत्यजः॥५०॥ व्यूह्य विभज्य॥ ॥छ॥ ॥इति श्रीभा
गवते महापुराणे द्वादशस्कंधेष्वादित्यव्यूहविभागो नामएकादशोऽध्यायः॥ ॥छ॥ द्वादशे द्वा०टी०
पुपुराणोक्तसर्वार्थानुक्रमः स्मृतः॥ प्रथमस्कंधमारभ्य प्राधान्येन समासतः॥ सूतोवाच॥ ८०
एतद्वः कथितं विप्रा विष्णोश्चरितमद्भुतं। भवद्भिर्यदहं पृष्टो नराणां पुरुषोचितं॥१॥ तदेव

मस्मिन् पुराणोक्तान् अर्थान् संक्षेपतो वर्णयिष्यन् धर्मादीन् प्रणमति॥छ॥ नमो धर्माय
महते वासुदेवाय धीमहि। ब्राह्मणेभ्यो नमस्कृत्य वक्ष्ये संक्षेपतोऽखिलं॥२॥ महते हरिभ
क्तिलक्षणाय। वासुदेवाय धीमते। बुद्धिवृत्तिस्थाय। ब्राह्मणेभ्यः ब्राह्मणान्॥छ॥ अत्र संकी
र्त्यते साक्षात् सर्वपापहरो हरिः॥ नारायणो हृषीकेशो भगवान् सात्वतांपतिः॥३॥ भगवा
न् ऐश्वर्यादिषड्गुणः साक्षात् संकीर्त्यते इति देवताकांडार्थः॥ ब्रह्मकांडार्थमाह। छ॥ अत्र
ब्रह्म परं गुह्यं जगतः प्रभवाव्ययं। ज्ञानं च तदुपाख्यानं प्रोक्तं विज्ञानसंयुतं॥४॥ गुह्यं
निर्गुणं। प्रभवाप्ययं प्रभवत्यस्मादिति प्रभवं। अप्येत्यस्मिन्नित्यप्ययं। अनेनास्य शास्त्र
स्येदं शिक्षितं॥ विज्ञानसंयुतं अपरोक्षज्ञानपर्यंतं। ज्ञानं च तदुपाख्यानं तत्र ज्ञानमुपाख्याय

तेप्रकाश्यतेयेन॥ तत्‌ज्ञानसाधनमित्यर्थः॥ छ॥ भक्तियोगस्यव्याख्यातोवैराग्यंचतदाश्रयं॥
परीक्षितमुपाख्यानंनारदाख्यानमेवच॥ ८॥ भक्तियोगस्यसाध्यसाधनरूपः॥ तदाश्रयं भ
क्तियोगेननिष्पादितं॥ एवंसामान्यतोनिरूप्यइदानींद्वादशस्कंधप्रकरणार्थान्‌अनुक्राम
ति॥ पारीक्षितमुपाख्यानंनारदाख्यानमेवच॥ प्रायोपवेशोराजर्षेः विप्रशापात्परीक्षितः॥ शु
कस्यचैवब्रह्मर्षेः संवादश्चपरीक्षितः॥ ५॥ पारीक्षितमुपाख्यानंपरीक्षिज्जन्मादितप्रस्तावा
यनारदाख्यानंच॥ ब्रह्मर्षेः ब्राह्मणोत्तमस्यशुकस्य॥ ॥छ॥ इतिप्रथमस्कंधः॥ ॥योग
धारणयोत्क्रांतिः संवादोनारदाजयोः॥ अवतारानुगीतंचसर्गः प्राधानिकोग्रतः॥ ९॥ उत्क्रां
तिः अर्चिरादिगतिः॥ प्राधानिकः प्राधानकार्यविराड्रूपः॥ अग्रतः आदितः महदादिक्रमेणेत्यर्थः॥ द्वा०टी० ८१

॥छ॥ इतिद्वितीयस्कंधः॥ ॥विदुरोद्धवसंवादः क्षत्तृमैत्रेययोस्ततः॥ पुराणसंहिताप्रश्नो
महापुरुषसंस्थितिः॥ प्रलयेत्स्मिन्नवस्थानं॥ छ॥ ततः प्राकृतिकः सर्गः सप्तवैकृतिका
श्चये॥ ततोब्रह्मांडसंभूतिः वैराजः पुरुषोयतः॥ ८॥ प्राकृतिकः प्रकृतिजवोगुणक्षोभ
रूपः॥ वैकृतिकः महदादयः॥ चकाराद्विकाराश्चतयोः तेषांसर्गः॥ छ॥ कालस्यस्थूलसूक्ष्म
स्यगतिः पद्मसमुद्भवः॥ भुवउद्धरणेंभोधौहिरण्याक्षवधस्तथा॥ ९॥ गतिः स्वरूपं॥
छ॥ ऊर्ध्वतिर्यगवाक्सर्गोरुद्रसर्गस्तथैवच॥ अर्धनारीनरस्याथयतः स्वायंभुवोम
नुः॥ १०॥ अर्द्धांयांनारीचनरश्चतस्य॥ छ॥ अवतारोभगवतः कपिलस्यमहात्मनः॥ दे
वहूत्याश्चसंवादः कपिलेनचधीमता॥ ११॥ इतितृतीयस्कंधः॥ ॥नवब्रह्मसमु

सत्तिर्दक्षयज्ञविनाशनं। ध्रुवस्य चरितं पश्चात् पृथोः प्राचीनबर्हिषः॥२३॥ नवब्रह्मणां म
रीच्यादीनां समुत्पत्तिः संतानः॥ छ॥ ॥इति चतुर्थस्कंधः॥ छ॥ नारदस्य च संवादः ततः प्रैय
व्रतं द्विजाः॥ नाभेस्ततोनुचरितं ऋषभस्य भरतस्य च॥२४॥ द्वीपाद्युपवर्णनं प्रथमं संक्षेपतः
ततो द्वीपादीनां ये गिरयो नद्यश्च तेषामुपवर्णनं। पातालनरकादीनां स्थितिः॥ अनेनैव नरक
निवर्त्तकमपाजामिलोपाख्यानं गृहीतं॥ छ॥ इति पंचमस्कंधः॥ दक्षयज्ञप्रचेतोभ्यः तत्सुता
णां च संततीः॥ यतो देवासुरनरास्तिर्यग्नगखगादयः॥२५॥ इति षष्ठस्कंधः॥ त्वाष्ट्रस्य जन्मनिधनं
पुत्रयोश्च दितेर्द्विजाः॥ दैत्येश्वरस्य चरितं प्रह्लादस्य महात्मनः॥२७॥ दितेः पुत्रयोः हिरण्या
क्ष हिरण्यकशिपोः॥ इति सप्तमस्कंधः॥ छ॥ मन्वंतरानुचरितं गजेंद्रस्य विमोक्षणं। मन्वंतराव

तारश्च विष्णोर्हयशिरादयः॥२८॥ कौर्म्यं मात्स्यं नारसिंहं वामनं च जगत्पतेः॥ क्षीरोदमथ
नं तद्वत् अमृतार्थे दिवौकसां॥२९॥ इत्यष्टमस्कंधः॥ देवासुरं महायुद्धं राजवंशानुकीर्त्तनं॥ इ
क्ष्वाकुजन्म तद्वंशाः सुद्युम्नस्य महात्मनः॥३०॥ राजवंशेति सोमवंशादि ऐलः तच्चरितं॥ छ॥
इलोपाख्यानमत्रोक्तं तारोपाख्यानमेव च। सूर्यवंशानुकथनं शशादाद्या नृपादयः॥३१॥
सौकन्यं चाथ शर्यातेः ककुत्स्थस्य च धीमतः। खट्वांगस्य च मांधातुः सौभरेः सगरस्य च॥
३२॥ रामस्य कौशलेंद्रस्य चरितं किल्बिषापहं। निमेरंगपरित्यागो जनकानां च संभवः॥३३॥
रामस्य भार्गवेंद्रस्य निःक्षत्रीकरणं भुवः। ऐलस्य सोमवंशस्य ययातेर्नहुषस्य च॥३४॥
दौष्यंतेर्भरतस्यापि शंतनोस्तत्सुतस्य च। ययातेर्ज्येष्ठपुत्रस्य यदुवंशोनुकीर्त्तितः॥ छ॥ ॥

इति नवमस्कंधः॥ ॥यत्रावतीर्णो भगवान् कृष्णाख्यो जगदीश्वरः। वासुदेवगृहे जन्म ततो
वृद्धिश्च गोकुले॥२६॥ तस्य कर्माण्यपाराणि कीर्त्तितान्यसुरद्विषः। पूतनासुपयःपानं शक
टोच्चाटनं शिशोः॥ तृणावर्त्तस्य निःपेषस्तथैव बकवत्सयोः॥२७॥ पूतनायाः असुसहित
स्तन्यपयसः पानं॥छ॥ धेनुकस्य सहभ्रातुः प्रलंबस्य च संक्षयः। गोपानां च परित्राणं दावा
ग्नेः परिसर्पतः॥२८॥ दमनं कालियस्याहेः महाहेर्नंदमोक्षणं। व्रतचर्या तु कन्यानां यत्र तुष्टो
च्युतो व्रतैः॥२९॥ प्रसादो यज्ञपत्नीभ्यो विप्राणां चानुतापनं। गोवर्द्धनोद्धरणं च शक्रस्य सु
रभेरय॥३०॥ इंद्राभिषेके कृष्णस्य स्त्रीभिः क्रीडा च रात्रिषु। शंखचूडस्य दुर्बुद्धेः वधोऽरिष्टस्य
केशिनः॥३१॥ अक्रूरागमनं पश्चात् प्रस्थानं रामकृष्णयोः। व्रजस्त्रीणां विलापश्च मथुराले भा॰टी॰ ८३

कनं ततः। गजमुष्टिकचाणूरकंसादीनां च यो वधः। मृतस्यानयनं सूनोः पुनः सांदीपनेर्गु
रोः॥३२॥ मथुरायां निवसता यदुचक्रस्य यत्प्रियं। कृतमुद्धवरामाभ्यां युतेन हरिणा द्विजाः॥
३३॥ जरासंधसमानीतसैन्यस्य बहुशो वधः। घातनं यवनेंद्रस्य कुशस्थल्या निवेदनं॥३४॥
आदानं पारिजातस्य सुधर्म्मायाः सुरालयात्। रुक्मिण्या हरणं युद्धे प्रमथ्य द्विषतो हरेः॥३५॥
हरस्य जृंभणं युद्धे बाणस्य भुजकृंतनं। प्राग्ज्योतिषपतिं हत्वा कन्यानां हरणं च यत्॥३६॥
चैद्यपौंड्रकशाल्वानां दंतवक्त्रस्य दुर्मतेः। शंबरो द्विविदः पीठो मुरः पंचजनादयः॥३७॥ मा
हात्म्यं च वधस्तेषां वाराणस्याश्च दीपनं। भारावतरणं भूमेर्निमित्तीकृत्य पांडवान्॥३८॥ इति
दशमस्कंधः॥छ॥ विप्रशापापदेशेन संहारः स्वकुलस्य च। उद्धवस्य च संवादो वासुदेवस्य

चानुगः॥४०॥यत्रात्मविद्या ह्यखिला प्रोक्ता कर्मविनिर्णयः। ततो मर्त्यपरित्यागः आत्मयोगानु
भावतः॥४१॥इत्येकादशस्कंधः॥छ॥युगलक्षणवृत्तिश्चेतकलौ नृणामुपप्लवः। चतुर्विधश्च
प्रलय उत्पत्तिस्त्रिविधा तथा॥४३॥देहत्यागश्च राजर्षेर्विष्णुरातस्य धीमतः। प्रणयनमृषे
र्मार्कंडेयस्य धीसत्कथाः॥४४॥महापुरुषविन्यासः सूर्यस्य जगदात्मनः॥छ॥इति द्वादशस्कंधा
इति चोक्तं द्विजश्रेष्ठा यत्पृष्टोहमिहास्मि वः। लीलावतारकर्माणि कीर्तनानीह सर्वशः॥४५॥
इति चोक्तमिति। चकारादन्यदपि वः युष्माभिः इह यत्पृष्टोस्मि तदुक्तमिति। किमेवं नानार्थ
कथनेन तत्राह। लीलेति। सर्वशः तत्तदर्थकीर्तनद्वारेणेत्यर्थः॥ तत्कीर्तनेनापि किमित्यपेक्षा द्वा०टी०
यां तत्फलमाह द्वाभ्यां॥छ॥पतितः स्खलितो वार्तः क्षुत्वा वा विवशो ब्रुवन्। हरये नम इत्यु ८४

च्चैर्मुच्यते सर्वकिल्बिषात्॥४६॥पतितः प्रासादादिभ्यः स्खलितः सोपानादिषु। आर्तः दुःखितः।
क्षुत्वा क्षुतं कृत्वा विवशोपि सर्वकिल्बिषान्मुच्यते नविष्यादेः॥छ॥संकीर्त्यमानो भगवाननंतः
श्रुतानुभावो व्यसनं हि पुंसां। प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोर्कोभ्रमिवातिवातः॥४७॥
संकीर्त्यमानः यद्वा श्रुतोनुभावो यस्य सः। पुंसां चित्तं प्रविश्य निःशेषं दुःखं विधुनोति। स नाम
नु नवं प्रमाणयति। अर्को गिरिगुहादिध्वांतं निवर्तयतीत्यर्थः॥ परितोषात् दृष्टांतरमाह।
अतिवातोभ्रमिवेति। हरिसंकीर्तनमेव महाफलं तद्व्यतिरिक्तं सर्वं मिथ्यालापमात्रमिति प्र
पंचयति चतुर्भिः मृषेति॥छ॥मृषा गिरस्ता ह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्षजः।
तदेव सत्यं तदु हैव मंगलं तदेव पुण्यं भगवद्गुणोदयं। तदेव रम्यं रुचिरं नवं नवं तदेव शश्वन्मन

सोमहोत्सवं। तदेवशोकार्णवशोषणं नृणां यदुत्तमश्लोकयशोनुगीयते॥४६॥ मृषागि
रः मिथ्यावाचः असतीः असत्याः। असतां कथायासु ताः॥ यत्तयासु उत्तमश्लोकस्ययशोऽनु
गीयतइतियत्। तदेवसत्यं। तदेवहिमंगलं। हरतिहर्षेनगवद्गुणानामभ्युदयोयस्मात्तत्।
नवंनवंयथाभवतितथारुचिरंरुचिप्रदंमहानुत्सवोयस्मात्॥छ॥ नतद्वचश्चित्रपदंहरे
र्यशोजगत्पवित्रंयदिवक्तिकर्हिचित्। तद्ध्वांक्षतीर्थंनतुहंससेवितंयत्राच्युतस्तत्रहि
साधवोमलाः॥४७॥ चित्राणिपदानियस्मिन् तदपिजगत्पवित्रयतीतितथातद्धरेर्यशोन
प्रगृणीतनवर्णयेत्। तद्वचः ध्वांक्षतीर्थंकाकतुल्यनराणां रतिस्थानं। नतुहंसैर्ज्ञानिभिःसे
वितं। तत्रहेतुः। यत्रेति। यत्राच्युतकीर्त्तनं तत्रैवसाधवः॥छ॥ इदानींज्ञानकर्मादरादपि

भा०टी०
८५

भगवत्कीर्त्तनादेवादरः कर्त्तव्यइत्याह॥छ॥ नैष्कर्म्यमप्यच्युतभाववर्जितं नशोभ
तेज्ञानमलंनिरंजनं। कुतः पुनः शश्वदभद्रमीश्वरे नचार्पितं कर्मतदप्यकारणं॥
४९॥ नैःकर्म्यंतत्प्रकाशकंयत्ज्ञानं। यतोनिरंजनंउपाधिनिवर्त्तकं। तदप्यच्युतभ
क्तिवर्जितंचेत् नशोभते। नापरोक्षपर्यंतंभवतीत्यर्थः॥ ईश्वरेनचार्पितंतर्हियदुत्तु
त्तमंसर्वोत्तममपिकर्मकुतः पुनःशोभते। यतः शश्वत्साधनकालेचअभद्रंदुः
खात्मकं। किंच॥छ॥ यशःश्रियामेवपरिश्रमःपरोवर्णाश्रमाचारतपःश्रुतादिषु। अ
विस्मृतिःश्रीधरपादपद्मयोः गुणानुवादःश्रवणादिभिर्हरेः॥५०॥ वर्णाश्रमाचारादिषु
यःपरोमहान्परिश्रमःसः। यशोयुक्तायांश्रियामेवकीर्त्तौसंपत्तिश्चकेवलंनपरमपुरु

पार्थ इत्यर्थः। गुणानुवादादिभिस्तु श्रीधरपादपद्मयोः अविस्मृतिर्भवति। ततः किं अत आह।
अविस्मृतीति। छ। अविस्मृतिः कृष्णपदारविंदयोः क्षिणोत्यभद्राणि शमं तनोति। सत्व
स्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तं॥ ५१॥ क्षिणोति नाशयति। अथेदा
नीं श्रोतॄन् आत्मानं चाभिनंदन्नाह। द्वाभ्यां॥ यूयमिति॥ छ॥ यूयं द्विजाग्र्या बत भूरिभा
गा यच्छश्वदात्मन्यखिलात्मभूतं। नारायणं देवमदेवमीशमजस्रभावा भजताविवि
श्य॥ ५२॥ हे द्विजाग्र्याः। यद्यस्मात् आत्मन्यंतःकरणे आवेश्य शश्वद् भजत। संभाव
नायां लोट्। अतो भूरिभागाः बहुपुण्याः। कथं भूतं। अखिलात्मभूतं सर्वांतर्यामि भा०टी०
णं। अत एव देवं सर्वोपास्यं। अदेवं न देवोऽन्यो देवो यस्मात्। अजः ईशः। यद्वा। यूयं भू ८८

रिभागाः तपआदिसंपन्नाः। ततो नारायणं भजतेति विधिः॥ छ॥ अहं च संस्मारित आत्मतत्वं श्रु
तं पुरा मे परमर्षिवक्त्रात्। प्रायोपवेशे नृपतेः परीक्षितः सदस्यृषीणां महतां च शृण्वतां॥ ५३॥
मयापि श्रुतं। एतत्पुराणश्रवणकीर्तनादिफलं फलं प्रपंचयितुं माहात्म्निः॥ छ॥ साहा
निस्तन्महत्छिद्रं स मोहः स च विभ्रमः॥ यत्तु कीर्तने स्मरणं वापि वासुदेवं न चिंतयेत्॥ ५४॥
यामं स्मरणं चेत्यर्थः॥ छ॥ एतद्वः कथितं विप्राः कथनीयोरुकर्मणः। माहात्म्यं वासुदेवस्य
सर्वाशुभविनाशनं॥ ५५॥ य एवं श्रावयेद्विद्वान् यामं स्मरणमनन्यधीः। श्लोकमेकं तदर्धं
वा पादं पादार्धमेव वा॥ श्रद्धावान् योऽनुशृणुयात् पुनात्यात्मानमेव सः॥ ५६॥ आत्मा
नमेव साक्षात् पुनाति न तु स्थानादि व्यवहर्मात्रं। छ॥ एकादश्यां द्वादश्यां च शृण्वन्नै

पुण्यंचाश्रावयेत्।पक्षंत्वनश्नन्प्रयतः पूतोभवतिपातकात्॥५७॥पुष्करेमथुरायांचकाश्यां
द्वारवतींतथा।अद्भ्यासंहितामेतांपठित्वामुच्यतेभयात्॥५८॥देवतामुनयःसिद्धाःपित
रोमनवोनृपाः।यच्छंतिशृण्वतःकामान्गृणतोयत्रकीर्तनात्॥५९॥ऋचोयजूंषिसामा
निद्विजोधीत्यानुविंदते।मधुकुल्यापयःकुल्याघृतकुल्याश्चतत्फलं॥६०॥ऋगाद्यधीत्य
द्विजोमधुकुल्यादियदनुविंदति।तत्फलंएतांसंहितांभागवतींश्रुत्वापठित्वावाअनुवि
दतइति।छ॥पुराणसंहितामेतांअधीत्यप्रयतोद्विजः।प्रोक्तंभगवतायत्तुतत्पदंपर भा०टी०
मंव्रजेत्॥६१॥विप्रोधीत्याप्नुयात्प्रज्ञांराजन्योदधिमेखलां।वैश्योनिधिपतित्वंचशूद्रः ८१
शुध्येतपातकात्॥६२॥राजन्यःउदधिमेखलांपृथ्वींसंधिराहैधी अस्यपुराणस्यएवं

शक्तिं।द्युपतिविरंचिशंकराद्यैःदुरवसितस्तवमच्युतंनतोस्मि॥६४॥जगदुदयस्थितिसंयमात्मउ४

प्रभावातिरेकेकारणमाह।छ॥कलिमलसंहतिकालनोखिलेशोहरिरितरत्रनगीय
तेह्यभीक्ष्णं।इहतुपुनर्भगवाननंतमूर्त्तिःपरिपठितोनुपदंकथाप्रसंगैः॥६३॥कलिम
लानांसंहतिंसमूहंकालयतिविनाशयतीतितथा।इतरत्रशास्त्रांतरे।शास्त्रप्रतिपादि
तंभागवतंनमस्करोति।छ॥तमहमजमात्मतत्त्वं।जगदुदयस्थितिसंयमात्मनोऽज्ञा
दयःशक्तयोयस्यतं।द्युपतिर्निर्देवैः दुरवसितःअज्ञातस्तवःस्तोत्रंयस्य।तं।उपचितन
वशक्तिभिःस्वआत्मन्नुपरचितस्थिरजंगमालयाय।भगवतउपलब्धमात्रधाम्नेसुरऋष
भायनमःसनातनाय॥६५॥उपचिताभिःउद्रिक्ताभिःनवशक्तिभिःप्रकृतिपुरुषमहद
हंकारपंचतन्मात्ररूपाभिः।स्वेआत्मन्येवउपरचितंस्थिरजंगमंवाआलयोयस्य।तस्मैन

गवते श्रीगुरुं नमस्करोति॥ छ॥ स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोप्यजितरुचि
रलीलाकृष्टसारस्तदीयं। व्यतनुत कृपया यस्तत्त्वदीपं पुराणं तमखिलवृजिनघ्नं व्यास
सूनुं नतोस्मि॥ छ॥ ॥इति श्रीभागवते महा० द्वादशस्कंधे प्रतिसंक्रमलक्षणो नाम द्वा
दशोऽध्यायः॥ ॥इदानीं सर्वपुराणसंख्यादीनुपवर्णयिष्यन्तत्कथनं श्रीदेवं प्रणमति।
सूतोवाच। यं ब्रह्मा वरुणेंद्ररुद्रमरुतः स्तुन्वंति दिव्यैः स्तवैः वेदैः सांगपदक्रमोपनिषदैर्गा दि०१
यंतियं सामगाः। ध्यानावस्थिततद्गतेन मनसा पश्यंति यं योगिनो यस्यांतं न विदुः सुरासुरग
णा देवाय तस्मै नमः॥१॥ स्तवैर्वेदैश्च स्तुन्वंत स्तुन्वंति। ते षडक्षरस्य अकारांतत्वं छंदोनुरोधेन। द्वा०टी०
ध्यानेनावस्थितं निखिलं तद्गतं यन्मनः। ते यस्यांतं न विदुः। सुरासुरगणाः ह्रीहोदमथनादौ दु ८८

यत्वमेव प्रदर्शयति। कूर्म्मावतारमनुस्मारयन्नाशिषं प्रापयति॥ छ॥ पृष्टे भ्राम्यदमंद
मंदरगिरिः ग्रावाग्र कंडूयनान्नि० द्रालोः कमठाकृते र्भगवतः श्वासानिलाः पांतु नः। यस्सं
स्कारकलानुवर्त्तनवशात्वेलानिभेनांभसां यातायातमतंद्रितं जलनिधेर्नाद्यापि विश्रा
म्यति॥२॥ पृष्टे भ्राम्यत् अमंदो गरिष्ठो गिरिस्तस्य ग्रावाग्रस्तेषां अग्र्याणि तैः कंडूयमानात्
जलनिधेरंभसां यातायातं अद्यापि न प्रशाम्यति। ननु समुद्रक्षोभादेव तत्र संस्कारवशा
त् तत्राह। वेलाक्षोभस्य मिषेण॥ छ॥ पुराणसंख्यासंभूतिर्मस्य वाच्यप्रयोजने। दानं दान
स्य माहात्म्यं पाठादेश्च निबोधत॥ छ॥ ब्राह्मं दश सहस्राणि पाद्मं पंचोन षष्टि च। श्रीवैष्णवं त्र
यो विंशत् चतुर्विंशति शैवकं॥४॥ दशाष्टौ श्रीभागवतं नारदं पंचविंशतिः। मार्कंडेयं च वाह्नं

दशपंचचतुःशतं।।५।।वाह्नंअग्निपुराणंदशपंचसहस्राणिचत्वारिंशतानि।।छ।।चतु
र्दशभविष्यस्यात्तथापंचशतानिचादशाष्टौब्रह्मवैवर्तंलिंगमेकादशैवतु।।७।।चतुर्विं
शतिवाराहंएकाशीतिसहस्रकं।स्कंदंशतंतथाचैकंवामनंदशकीर्तितं।।८।।एवंपुराण
संदोहश्चतुर्लक्षउदाहृतः।।रामायणंभारतंचख्यातंकाव्येतिहासकं।।९।।महाभारतमि
तिहासःरामायणंचऋषिप्रोक्तंकाव्यं।अतःपुराणानांसंदोहःसमूहःचतुर्लक्षसंख्याकएव।
छ।।तत्राष्टादशसाहस्रंश्रीमद्भागवतंविदुः।।इदंभगवतापूर्वंब्रह्मणेनाभिपंकजे।।स्थिताय
भवभीतायकारुण्यात्संप्रकाशितं।।१०।।आदिमध्यावसानेषुवैराग्याख्यानसंयुतं।हरिली
लाकथाव्रातामृतानंदसरिद्वरं।।११।।हरिलीलाकथाव्रातःसमूहःसएवामृतंतेनानंदिताः

संतोयेनततं।।छ।।सर्ववेदांतसारंतत्ब्रह्मात्मैकत्वलक्षणं।वस्त्वद्वितीयंतन्निष्ठंकैव
ल्यैकप्रयोजनं।।१२।।तन्निष्ठंतद्विषयं।।छ।।प्रोष्ठपद्यांपौर्णमास्यांहेमसिंहसमन्वितं।
ददातियोभागवतंसयातिपरमांगतिं।।१३।।प्रोष्ठपद्यांभाद्रपद्यांपूर्णिमायांहेमसिंह
समारूढंयोभागवतपुस्तकंभागवतायददाति।परमांअत्युत्तमांदाहप्रलयवर्जि
तांगतिंप्राप्नोति।नकेवलमेतावत्।छ।।धर्मार्थकाममोक्षाणांयद्वांछतिमानवः।
पुत्रपौत्रकलत्रंवातत्तत्प्राप्नोत्यसंशयं।।१४।।राजंतेतावदन्यानिपुराणानिसतांगणे।या
वद्भागवतंपुण्यंश्रूयतेमृतसागरं।सर्ववेदांतसारंतत्श्रीमद्भागवतंविदुः।तद्रसामृत
तृप्तस्यनान्यत्रस्याद्रतिःकचित्।।१५।।तद्रसासएवअमृतंतेनतृप्तस्यनिर्वृतस्यपुराण

श्रवणेतस्यनिर्वृत्तिर्नवतीतिभावः॥ छ॥ निम्नगानांयथागंगादेवानामच्युतोयथा। वैष्ण
वानांयथाशंभुर्वर्णानांब्राह्मणोयथा॥१७॥ क्षेत्राणांचैवसर्वेषांयथाकाशीह्यनुत्त
मा। तथापुराणव्रातानांश्रीमद्भागवतंद्विजाः॥१८॥ श्रीमद्भागवतंपुराणममलंयद्वै
ष्णवानांप्रियंयस्मिन्पारमहंस्यमेकममलंज्ञानंपरंगीयते। यत्रज्ञानविरागभक्तिस
हितंनैःकर्म्यमाविःकृतंत—   विचारणपरोभक्त्याविमुच्येन्नरः॥१९॥ पारमहं
स्यंपरमहंसैःप्राप्यंनैःकर्म्यंसर्वकर्मोपरमः। भक्त्यातच्छ्रवणादिपराविमुच्यते। श्रीभा
गवतसंप्रदायप्रवर्त्तकरूपेणभगवद्ध्यानलक्षणंमंगलमाचरति। कस्मैयेनविभासि
तोयमतुलोज्ञानप्रदीपःपुरातद्रूपेणचनारदायमुनयेकृष्णायतद्रूपिणे। योगीन्द्राय

भा०टी०
९०

तदात्मनाथभगवद्व्रातायकारुण्यतस्तच्छुद्धंविमलंविशोकममृतंसत्यंपरंधीमहि॥२०॥
येनश्रीनारायणेनकस्मैब्रह्मणेअतुलःअसमःपुराकल्पादौतद्रूपेणब्रह्मरूपेण
नारदायतद्रूपिणानारदरूपिणाकृष्णायमुनयेतद्रूपेणव्यासरूपेणआत्मरूपाय
शुकायतदात्मनाशुकरूपेणभगवद्व्रातायपरीक्षितेतत्परंसत्यंश्रीनारायणरूपंधी
महीति। गायत्र्यैवोपक्रमंउपसंहारेचगायत्र्याख्यंब्रह्मविद्येयमितिदर्शयति। तमेव
देवतारूपेणगुरुरूपेणचप्रणमति॥ छ॥ नमस्तस्मैभगवतेवासुदेवायसाक्षिणे। सं
सारसर्पदष्टंयोविष्णुरातममूमुचत्॥२१॥ भावार्थदीपिकामेतांभगवद्भक्तवत्सलां।
श्रीपरानंदपादाब्जभृंगःश्रीश्रीधरोकरोत्। स्वबालचपलालापैःस्वलीलापरिनर्तितः॥

प्रीयतां परमानंद नृहरिः सद्गुरुः स्वयं॥ श्रीपरानंद संज्ञोस्यै गुरुं भागवतं मया॥ विश्रुतं तन्म
तेनेदं — उमन्मलिवैनवार॥ ॥छ॥ ॥इति श्रीभागवते महापुराणे द्वादशसाहस्र्यां
संहितायां द्वादशस्कंधे सर्वपुराणसंख्याकथने त्रयोदशोऽध्यायः॥ ॥छ॥ ॥छ॥ ॥
समाप्तं श्रीभागवतं॥ ॥ ॥श्री॥॥ ॥संवत् १७१९ वर्षे माघ शुदि १० गुरौ लिखितं॥ ॥
॥ ॥श्रीरस्तु॥ ॥शुभं भवतु॥ ॥ ॥कल्याणमस्तु॥ ॥जयोस्तु॥ ॥छ॥ ॥

द्वा॰ टी॰
८१